# RASHTRIYA SANSKRIT VIDYAPEETHA

**(Deemed to be University - Estd. U/S 3 of UGC Act 1956**
**Accredited with CGPA of 3.71 on Four Point Scale at A Grade by NAAC (2nd Cycle)**
**TIRUPATI - 517 507 (A.P.)**




# SEMUSHI शेमुषी


**Volume - XIII** *Vidyapeetha News Letter* **JAN-OCT, 2017**


वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
सनो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा।। (ऋग्वेदः १०.८१.७)

***Let us, this day, invoke for our protection the Lord of Speech, the Creator of all, who is swift as thought; may He, the Bestower of all happiness, the doer of good works, be propitiated by all our oblations, (so as) to grant us his protection. (Rgveda 10.81.7)***



भारतस्य समृद्धः इतिहासः संस्कृतिः परम्परा च संस्कृते अस्ति । संस्कृतस्य ज्ञानमस्मान् तेन समृद्धवैभवोपेतेन अतीतेन सह योजयति । संस्कृतप्रेमिभ्यः तथा च अस्याः सुन्दर्याः भाषायाः पठितृभ्यः सर्वेभ्यः संस्कृतदिवससन्दर्भे मम हार्दिकशुभकामनाः ।

**[India's rich history, culture and tradition are in Sanskrit. The knowledge of Sanskrit connects us with our rich literature, heritage and glorious past. On the occasion of Sanskrit Day I extend my heartfelt greetings to the scholars and students of this beautiful language.]**

## मुख्यवार्ताः


1) विंशः दीक्षान्तसमारोहः (पृ.4)
2) एकादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभ-समारोहः (पृ.9)
3) मातृभाषादिवसोत्सवः (पृ.11)
4) अखिलभारतीयग्रन्थजातसंग्रहकार्यशाला (पृ.12)
5) अनुसन्धातॄणां कृते राष्ट्रियसङ्गोष्ठी कार्यशाला च (पृ.14)
6) संस्कृतसप्ताहमहोत्सवः (पृ.18)
7) अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गः (पृ.20)
8) पादपरोपणमहोत्सवः (पृ.23)
9) श्रीचैतन्यदर्शनसिद्धान्तमाधृत्य द्विदिवसीया राष्ट्रियसङ्गोष्ठी (पृ.24)
10) MOOCS परिचयसमावेशः (पृ.26)
11) पञ्चचत्वारिंशद्दिनात्मकं योगचिकित्साशिबिरम् (पृ.27)
12) कुलपतीनां स्पेयिन्-यात्रा (पृ.28)
13) बी.आर्.आम्बेदकरजयन्ती (पृ.31)
14) संस्कृते ई-कोशः (पृ.15)
15) संस्कृते विज्ञानम् — उदकार्गलम् (पृ.22)


## कुलपतीनां स्पेयिन्-देशयात्रा



(From Left) **Prof. Kamalesh Datta Tripathi, Prof. S.R.Leela, Prof. Abhiraja Rajendra Mishra, Prof.V.Muralidhara Sharma (V.C.), D.B.Venkateswar Varma (Ambassidor of India in Spain), Dr. Marcos David Kahle**

# चित्रवार्ता:

## नवकुलसचिवनियुक्तिः



दूरविद्याकेन्द्रस्य निदेशका:, साहित्यसङ्कायप्रमुखा:,
अनुसन्धानप्रकाशनविभागाचार्या:
**आचार्या: सिएच्.पि.सत्यनारायणमहोदया:**
विद्यापीठस्य प्रभारिकुलसचिवत्वेन
२६.१०.२०१७ तमे दिनाङ्के नियुक्ता:

**विद्यापीठपक्षत: तेभ्यो हार्दानि शुभाभिनन्दनानि विज्ञाप्यन्ते ।**



**प्रो.अलारिकप्रमुखैर्वैदेशिकविद्वद्भिस्सह महर्षिमहेशयोगि-भावातीतप्रशिक्षणकार्यक्रमविषये मन्त्रणां कुर्वन्त: कुलपतय:**



**कुलपतिसमेता: विद्यापीठस्य सर्वेऽपि परिवारसदस्या: आन्तर्जातीयाहिंसादिवसावसरे शपथं कुर्वन्तस्सन्ति ।**



**छात्रावासदिवसमहोत्सवे तिरुपतिस्थभारतीयप्राविधिककेन्द्रनिदेशकानां (Director, IIT) प्रो.के.सत्यनारायणमहोदयानां कुलपतिभि: सत्कृति:**



**संस्कृतसप्ताहमहोत्सवे कविसम्मेलनसन्दर्भे कुलपतिभि: सम्मानिता: आचार्यसुदर्शनशर्ममहोदया:**



**विद्यापीठस्य प्राक्तनकुलपतीन् महामहोपाध्याय-पद्मभूषण-नावल्पाक्कं शठकोपरामानुज-ताताचार्यमहोदयान् सम्मानयन्त: विद्यापीठकुलाधिपतिसमेता: कुलपतय:**



**अन्ताराष्ट्रिययोगदिवसमहोत्सवे भाषमाणा: अतिथय: चित्तूरुजिल्लाधिकारिण: श्रीप्रद्युम्नमहोदया:**



**२०१७ तमे वार्षिकोत्सवे श्रीमुक्तेश्वरराव (परियोजनाधिकारी, ति.ति.देवस्थानम्) वर्याणां सम्माननम्**



## कुलपतीनां लेखनीत:



भारतदेशे सप्तदशसंस्कृतविश्वविद्यालया: एकसहस्रं पारम्परिकसंस्कृत-महाविद्यालया:, पञ्चसहस्राधिका: पारम्परिकसंस्कृतपाठशालाश्च सन्ति । एतदतिरिच्य विविधराज्येषु अनेके संस्कृतविद्यालया:, सामान्याश्च विद्यालयास्सन्ति यत्र संस्कृतं विषयत्वेन भाषात्वेन च पाठ्यते । इत्थं पूर्वोक्तेषु नानाविधसंस्कृतशिक्षणसंस्थासु लक्षशश्छात्रा: विविधस्तरेषु संस्कृतशास्त्राणि, संस्कृतभाषाञ्च पठन्तस्सन्ति, सहस्रश: अध्यापका: तान् पाठयन्ति च । संस्कृतशिक्षणरङ्गे एवं जायमानां प्रगतिमवलोक्य महान् सन्तोषो जायेत । परं वास्तविकतया विमृश्यमाणे भौतिकप्रगतिरियम् अत्यन्तमानन्ददा न भाति । संस्कृतविश्वविद्यालयानाम्, संस्कृतमहाविद्यालयानाम् तेषु अधीयानानां छात्राणां सङ्ख्यावृद्ध्या च महती प्रगतिस्साधितेति नालं वक्तुम् । शोथेन पीनं शरीरं स्वस्थमिति कथं नु कथयितुं शक्नुम: ? यावत्समग्रसंस्कृतशिक्षणप्रणाल्यां गुणस्तरो न वर्धेत तावदुद्दिष्टो विकासो जात इति वक्तुं न शक्यते । संस्कृतशिक्षणप्रणाल्यां विशिष्य संस्कृतविश्वविद्यालयीयशिक्षणप्रणाल्यां गुणस्तरवर्धकानां विभिन्नशैक्षिककार्यक्रमाणां क्रियान्वयेन तत्र अपेक्षिता गुणवत्ता सुसाधैव । संस्कृतविश्वविद्यालयानां संस्कृतमहाविद्यालयानाञ्च शिक्षाप्रणाल्यां परिदृश्यमानानां गुणह्रासकारणानां परिहरणेन पूर्वोक्तं साधयितुं शक्यम् । तदिह मनाग् विमृश्यते । **गुणह्रासकारणानि –**

**(१) शिक्षकाणां व्युत्पत्तिप्रवर्धकानां शिक्षणसरणौ मार्गनिर्देशकानां च कार्यक्रमाणामभाव:** । "क्षणादूर्ध्वमतार्किक:", "अनभ्यासे विषं शास्त्रम्" इत्याद्युक्तयो ननु प्रसिद्धा: । अध्याप्यमानशास्त्राणां विशेषज्ञानवर्धनाय विशिष्टप्रशिक्षणवर्गाणां, शास्त्रचर्चादिकार्यक्रमाणां सङ्घायशो, विभागश: नियतकालिक्रमायोजनं शिक्षकाणां गुणस्तरवृद्धयेऽवश्यं कल्पते । इमे च चर्चाकार्यक्रमा: प्रारम्भे उत्साहवर्धका: ततश्च नीरसा: यथा न स्यु: परं ज्ञानवर्धनार्था: प्रेरणादायका: स्युर्यथा तथा आयोज्या: । अत्र यान्त्रिकता न स्यात् । सर्वेषां शिक्षकाणां, शोधच्छात्राणां वरिष्ठच्छात्राणाञ्च भागग्राहिता नियमतया यथा स्यात्तथा प्रबन्धनं विधेयम् । ईदृशकार्यक्रमायोजनेन नैके लाभा: । १— शिक्षका: स्वशास्त्रे विशेषतया परिश्रम्य गोष्ठ्यां भागं गृह्णन्तीति कारणत: तच्छास्त्रज्ञानं वर्धते । २— कनिष्ठशिक्षका:, वरिष्ठच्छात्रा:, शोधच्छात्राश्च वरिष्ठशिक्षकेभ्य: अस्मिन् विषये मार्गदर्शनं लभन्ते । ३— शिक्षकेषु पारस्परिकसम्बन्धा: विकसन्ति ।

**(२) प्रारम्भिकच्छात्राणां शैक्षणिकमार्गदर्शनाभाव:** । ये च दशमकक्ष्यामुत्तीर्य प्राक्शास्त्र्यादिकक्ष्यासु प्रविशन्ति तच्छात्राणां संस्कृतभाषाया:, तद्वाङ्मयस्य मौलिकज्ञानदानाय सम्भाषणशिबिर-कथाकथनप्रशिक्षणवर्ग-काव्यवर्गादिवर्गा: शब्दधातु-अमरकोशादि-कण्ठस्थीकरणकक्ष्येत्यादिविशिष्टकक्ष्या: नियततया सञ्चाल्या: । ईदृशकक्ष्याणां नियतसञ्चालनेन वर्षावधौ महत्फलं साधयितुमलम् । १— एषां बालानां सुखबोधाय प्रारम्भिककक्ष्याणां पाठ्यक्रमे सरलसंस्कृतभाषया शास्त्राणां परिचयात्मकग्रन्था: पाठ्यपुस्तकरूपेण स्थापनीया: । २— प्रारम्भे प्राप्तपर्याप्तशिक्षणप्रेरणा इमे छात्रा: विद्यावारिधिपर्यन्तं विश्वविद्यालये अधीत्य शास्त्रेषु व्युत्पन्ना अवश्यं भविष्यन्ति ।

**(३) संस्कृतशिक्षणसंस्थानां सामाजिकसम्बन्धाभाव:** । बहुत्र संस्कृतविश्वविद्यालयेषु महाविद्यालयेषु च अपेक्षितच्छात्रसङ्ख्या न दृश्यते । शिक्षका: सम्भाषणशिबिर-योगप्रशिक्षणादिकार्यक्रमाणां समाजोपयोगि-विशिष्टप्रमाणपाठ्यक्रमाणां (Certificate Course on Yoga, Vastu, Vedic Mathematics) इत्यादीनां समायोजनेन सामाजिकानां ध्यानं संस्कृतं प्रति संस्कृतशिक्षणसंस्थां प्रति च आकर्षेयु: । अनेन शनैश्छात्रसंख्या वर्धते ।

संस्कृतविश्वविद्यालय-महाविद्यालयादिषु प्रचाल्यमानानां नानाकार्यक्रमाणां प्रचारार्थं नगरस्थानाम् आकाशवाणी-दूरदर्शन-वार्तापत्रिकादिसामाजिकमाध्यमानां पर्याप्तोपयोगेन संस्कृतं प्रति समाजं सुकरतया आक्रष्टुं शक्नुम: ।

**(४) संस्कृतमयवातावरणाभाव:** । संस्कृतशिक्षणसंस्थासु सरलसम्भाषणशिबिरसञ्चालनाद्युपायै: संस्कृतमयं वातावरणमुत्पाद्य न्यूनातिन्यूनतया कक्ष्यासु संस्कृतेनैव भाषणीयमिति नियम: कार्य: ।

पूर्वोक्तकार्यक्रमाणां नियतं प्रभावि च सञ्चालनं संस्कृतविश्वविद्यालयानां संस्कृतमहाविद्यालयानाञ्च गुणस्तरवर्धने महदुपकारकं भवतीत्यत्र न खलु शङ्काकलङ्क: । पूर्वोक्तकार्यक्रमाणाम् आयोजने अदो विद्यापीठम् अग्रेसरदस्ति ।

मुरलीधर:

**(आचार्य मुरलीधरशर्मा)**
कुलपति:

# विंशः दीक्षान्तसमारोहः

**दिनाङ्कः - 23-02-2017**



प्रतिवर्षमिव ऐषमोऽपि राष्ट्रियसंस्कृतविद्यापीठस्यास्य विंशः दीक्षान्तसमारोहो महता वैभवेन विद्यापीठान्तेवास्यध्यापकसमेत-कुलाधिपति-कुलपति-विशिष्टातिथि-प्रबन्धपरिषत्-विद्वत्परिषत्-सदस्यानां समुपस्थितौ समायोजितः । अत्र प्रायशः 48 विद्यावारिध्युपाधिभाजः, 76 विशिष्टाचार्योपाधिधारिणः, 383 आचार्यच्छात्राः, 128 शास्त्रिच्छात्राः, अन्ये च बहवो हिन्दी-शाब्दबोध-MAIMT-B.SC. छात्राः कुलाधिपतीनामनुशासनपठनपूर्वकं स्वीयोपाधीन् अध्यगच्छन् । भारतीयसंस्कृतौ मानवजीवनस्य मूलाधाराः भवन्ति संस्काराः । मानवानां जन्मनः प्रारभ्य मृत्युं यावत् विविधस्तरेषु विविधकार्याणां प्रारम्भिकदशायां श्रुति-स्मृतिग्रन्थप्रतिपाद्यनियमावलीभिः विविधाः संस्कारास्सम्पद्यन्ते । तेषु गुरुकुलशिक्षासमाप्त्यनन्तरं स्नातका यदा समाजं प्रत्यावर्तन्ते स्म तदा गुरुकुलस्य कुलपत्याचार्योपाचार्याध्यापकादीनां समुपस्थितौ विशिष्टः कोऽपि संस्कारः समायोज्यते स्म । स एव संस्कारः समावर्तनसंस्कार इति नाम्ना प्रसिद्धः अधुनातन-शिक्षानुष्ठानेषु महाविद्यालयेषु दीक्षान्तसमारोहनाम्ना प्रचलति ।

तादृशमहोत्सवस्यास्य शुभारम्भः शैक्षिकभवनतः शोभायात्रया विहितः । वेदिकायां वैदिकप्रार्थना, विद्यापीठप्रार्थना, कुलाधिपतीनां दीक्षान्तसमारोहस्यारम्भोद्घोषणम्, कुलपतीनां स्वागतभाषणम्, मुख्यातिथीनां दीक्षान्तसन्देशभाषणम्, कुलाधिपतीनामध्यक्षभाषणम्, त्रयाणां पण्डितप्रवराणां लब्धयशस्कानामाचार्याणां कृते महामहोपाध्यायोपाधिप्रदानम्, द्वयोः विद्वद्वरेण्ययोः कृते वाचस्पत्युपाधिप्रदानम्, स्नातकानां कृते उपाधिप्रदानमित्यादयः बहवोंऽशाः कार्यक्रमेऽस्मिन् समन्वतिष्ठन् । भारतीयोच्चतमन्यायालयस्य न्यायाधीशचराः श्री.बि.एन्.श्रीकृष्णमहाभागाः मुख्यातिथिरूपेण समागत्य स्वीयबहुमूल्यवचोभिः स्नातकान् प्राबोधयन् । मुख्यातिथीनां दीक्षान्तसन्देशः, कुलाधिपतीनामध्यक्षभाषणञ्चात्र संक्षेपेण प्रदीयेते ।

## मुख्यातिथीनां दीक्षान्तसन्देशः



अस्याः संस्थायाः किमपि महत्त्वं वैशिष्ट्यं च वर्तते यदन्येषां विश्वविद्यालयानां नास्ति यदियं गैर्वाण्यां, अस्माकं शास्त्रपरम्परायाश्च पुनरुज्जीवनशाश्वतप्रतिष्ठालाभयोरनुपदं कृतोद्यमा । सा च शास्त्रपरम्परा प्राचीना वन्दिता च । तस्याः संवर्धने कृतोद्यमाः अत्रस्थाः अध्यापकाः छात्राश्च कृतज्ञता-पूर्वकमभिनन्दनीयाः ।

''सा विद्या या विमुक्तये'' इति वै विष्णुपुराणोक्तिः । अत्र विमुक्तिर्नाम का इति चिन्तनीयम् । यद्यपि वेदान्तशास्त्रे विमुक्तिरित्यस्य शब्दस्य निर्वचनं जन्ममृत्युजराबन्धनान् मुक्ति-





रित्युच्यते। तथापि सामाजिकदृष्ट्या शब्दस्यास्य निर्वचनमन्यथाऽपि कर्तुं शक्यते । हिंसाद्वेषासूयादिभ्यो मनसः प्रवृत्तिभ्यो विमोचनमेव विमुक्तिरिति कथितुं पार्यते । इयं च मुक्तिः सद्विद्ययैव सम्प्राप्या । सा च सद्विद्या ईदृशीषु संस्थासु प्राप्या । इदमप्यस्याः श्रेष्ठतायाः कारणम् । सद्विद्यया सम्पूतमनस्काः छात्राः समाजस्य राष्ट्रस्य चोन्नतिं कुर्युः ।

विनयाधानमपि विद्यायाः अन्यत्फलम् । ''विद्या ददाति विनय''मिति सुभाषितम् । विद्यासंस्थासु यथा विद्या अध्याप्यते तथा विनयाधानमप्यत्यन्तमावश्यकम् । विद्यार्थिदशायाम् आप्तविद्यया एव देशस्यास्य श्रेष्ठनागरिकाः भवितुमर्हन्ति । कतिपयेभ्यो हायनेभ्यः प्राक् भारतसर्वकारनियमितः विश्वविद्यालयायोगः स्वावेदने विश्वविद्यालयेषु अध्यापकाध्येतॄणां नैतिकह्रासं विनयाभावतां च प्रदर्श्य तेषु विनयस्य संस्कृतेश्च वृद्धेरावश्यकतां च न्यवेदयत् । अत्र शास्त्राध्यायिनां च विषये नैषा कथा यतः शास्त्राध्ययने स्वाभाविकं विनयाधानमेवास्य हेतुरित्यवगम्यते मया । रघुवंशकाव्ये ''प्रजानां विनयाधानाद्रक्षणाद्भरणादपि स पिता पितरस्तासां केवलं जन्महेतवः'' इति ब्रुवता कविकुलगुरुणापि विनयाधानस्य मुख्यता सूचिता ।

माकिं सप्ततिहायनेभ्यः प्रागेव राष्ट्रपितेति ख्यातनामा गान्धिमहोदयः अस्मद्राष्ट्रोन्नतेः अन्तरायभूतान् सप्तदोषान् संख्यातवान् । ते च –

(1) तत्त्वविहीना राजनीतिः (2) विना श्रमेण प्राप्ता सम्पत्तिः
(3) अन्तस्साक्ष्यनवरुद्धो भोगः (4) शीलोज्झिता विद्या
(5) नीतिशून्यं वाणिज्यम् (6) त्यागरहिता अर्चा
(7) मानवीयत्वरहितं विज्ञानतन्त्रमिति ।

गान्धिमहोदयेन सप्ततिवर्षेभ्यः प्राग् यदुक्तं तदद्यापि सत्यमित्याभाति । ते च दोषाः नापाकृता अपि तु प्रवर्धिता एवेति दृश्यन्ते ।

विवेकानन्दस्वामिना उक्तमस्माभिः सैव विद्या सम्पाद्या यया शीलवृत्ते संवर्धेते, मनस्तत्त्वं प्रवर्धतेतराम्, बुद्धिरसङ्कुचिता स्यात्, यया च स्वपादयोरुत्तम्भबलं चाप्रतिहतं स्यादिति । सैव विद्या प्रापणीया या उक्तदोषैर्विमुक्ता उक्तगुणैश्च सम्पन्ना स्यात् ।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशस्सुखकरी विद्या गुरूणां गुरुः।
विद्याबन्धुजनो विदेशगमने विद्या परादैवतं
विद्या राजसु पूज्यते न हि धनं विद्या विहीनः पशुः।।

इति भणता भर्तृहरिणाऽपि विद्यायाः श्रैष्ठ्यं प्रादर्शि । अतो हेतोः भारतीयानां संस्कृतौ विद्यायाः विद्याप्रदातॄणां च अत्युन्नतं पदं विद्यते । तदौन्नत्यं परिरक्षणीयं सर्वैराचार्यैः आदर्शप्रायाः भूत्वा छात्राणाम् । गुरुमाहात्म्यं तु शास्त्रेषु बहुधा वर्णितमास्ते । आचार्यशङ्करभगवत्पादैः मनोज्ञतया तदुपवर्णितं शतश्लोक्यां -

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम् ।
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरोः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वालौकिकोऽपि।।

विद्यालयैः कीदृशैर्भाव्यमिति चेत् योग्यानां छात्राणाम् अध्यापनकुशलैर्विद्याः अध्याप्यन्ते अधीता च विद्या स्वहिताय, राष्ट्रहिताय, समाजहिताय च उपयुक्ता भवेत् । बुद्धेर्विस्तारः सम्पाद्यते, अधीतिनः विद्यार्थिनो विनयमूर्तयः समाजस्य राष्ट्रस्य च हितं स्वहितादधिकं मन्वते । ते तु विद्यालयाः अन्वर्थाः भवितुमर्हन्ति ।

अध्यापकाश्च विद्याविनयसम्पन्नाः स्वसंस्कृत्यभिमानिनः, सात्त्विकाः, सत्यवाचः, शिष्यहितैषिणः भवेयुः येषां सहवासबलेन दीपात्प्रवर्तिता दीपा इव शिष्या अपि तेषां साम्यं प्राप्नुयुः । ते खलु प्रातःस्मरणीया भवेयुः । विद्यापीठमिदमीदृशमित्यहं दृढं विश्वसिमि ।

अयि प्रेयांसः विद्यार्थिनः ! ''वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति'' इत्यारभ्य ''एष उपदेशः एषा वेदोपनिषत्, एतदनुशासनम्,एवमुपासितव्यम्,एवं चैतदुपास्यम्'' इत्यन्तात् तैत्तिरीयोपनिषदुपदिष्टात् परमनुशासनं दुर्लभम् । तत्तु भवद्भिः ज्ञातमेवेति न पुनरावर्तनं क्रियते । किन्तु तत्पुनः पुनरनुसन्धत्त । भविष्यति काले भवन्तः सर्वे देशस्यास्य सुप्रजाः भूत्वा तस्य संस्कृतेः रक्षितारो भवितुमर्हन्ति । भवदधीनमस्मच्छास्त्रशेवधेः परिरक्षणम् । तच्च अधीतिबोधाचरणप्रचारैरेवेति मा विस्मरत । शास्त्रविहितं लोकसम्मतं च समाचरत । अध्यापकैरपि तथा व्यवहर्तव्यं यथायं नः पिताऽस्मान् अविद्यायाः परं पारं तारयतीति शिष्याः निश्चिनुयुः। विद्याधनाभिजनत्वानि भवत्सु मा मदं जनयन्तु । विद्या च भवत्सु विनयं प्रसूयताम् । ''समानी व आकूतिः समाना हृदयानि वः समानमस्तु मनो वो यथानस्सुसहासति'' इतीमां श्रुतेरुक्तिं सदैव संस्मृत्य लोके समाचरत ।

शन्नो मित्रश्शं वरुणः । शन्नो भवत्वर्यमा ।
शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः ।
नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् ।
सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् ।
आवीन्माम् । आवीद्वक्तारम् ।
ॐ शान्तिः शान्तिः शान्तिः ।

## कुलाधिपतीनामध्यक्षभाषणम्



विंशतितमे दीक्षान्तसमारोहेऽस्मिन् महामहिमशालिनः पद्मभूषणोपाधिभाजः भारतसर्वकारमुख्यनिर्वाचनायोगचराः, भारतस्य संस्कृतिमन्त्रालयसचिवरूपेण भारतनिर्वाचनायोगस्य प्राक्तनाध्यक्षाः, राष्ट्रियपाण्डुलिपिमिशन् इति संस्थायाः सूत्रधाराः, वेदगानस्य कृते विश्वसन्दायस्तरप्रदानार्थं (World Heritage Status) UNESCO सविधे कृतप्रस्तावाः, भारतीयसंस्कृतविश्वविद्यालायानां सर्वतोमुखविकासाय भारतसर्वकारेण संरचितायाः विशिष्टसमितेः अध्यक्षरूपेण मार्गसूचिकानिर्मातारः, श्रीनीडमङ्गलं गोपालस्वामिमहोदयाः अस्माकं प्रियतमाः कुलाधिपतयः अध्यक्षपदवीं निरुह्य उपाधिभाजां स्नातकानां कृते अनुशासनपूर्वकमुपाधीन् प्रदाय स्वीयाध्यक्षभाषणेन सर्वान् प्राचोदयन् । तेषामभिभाषणम् इत्थमनुवर्तते —

''इदं विद्यापीठं संस्कृतक्षेत्रे विशिष्टेषु तत्तज्ज्ञानक्षेत्रेषु च कृतभूरिपरिश्रमाणां विदुषां योगदानं पुरस्कृत्य तान् सत्कृत्य च अमन्दमानन्दं, महद्गौरवञ्च अनुभवति । ते खलु स्वस्वक्षेत्रेषु विलक्षणज्ञानवन्तस्सन्ति । गतवर्षे एकोनविंशे दीक्षान्तसमारोहे प्रदत्ते मदीयभाषणे भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयः संस्कृतस्य अभ्युन्नतये दीर्घालोकाय च मार्गदर्शनं प्रदातुमेकां समितिमायोजयत् । इयं समितिः षोडशोत्तरविंशे क्रीस्तुसंवत्सरे फिब्रवरिमासे प्रतिवेदनं मन्त्रालयाय आर्पिपत् । तस्मिन् प्रतिवेदने संस्कृतविश्वविद्यालयेषु संस्कृतशिक्षासम्बन्धिनः अनेकाः विशिष्टाः संस्तुतयः संसूचिताः । तासु संस्तुतिषु बह्व्यः संस्तुतयः विश्वविद्यालयैरेव आचरणीयास्सन्ति । अस्माकं नूतनाः कुलपतयः तासां संस्तुतीनां बिन्दून् आश्रित्य कार्यप्रणालीं तदाचरणञ्च कर्तुं कटिबद्धाः भवाम इति प्रतिश्रुतवन्तः । अहं प्रथमतः मानवसंसाधनविकासमन्त्रालयाधीनयोः द्वयोः विश्वविद्यालययोः कुलपतिद्वयं तदनु अन्येषां चतुर्दश संस्कृतविश्वविद्यालयानां कुलाधिपतीन्, कुलपतींश्च एतद्विषये तदीयं योगदानं कर्तुमनुरुन्धे । अहमस्मिन् प्रसङ्गे मदीयमाशयं निश्चयात्मकतया प्रकटयामि, यदग्रे अस्माकं समस्याः अस्माभिरेव निवारणीयाः, एतदर्थमितरेषां प्रतीक्षा कदाऽपि न कार्येति । इतरे साहाय्यं कुर्युः न तु प्रवर्तकाः भवेयुः । ''उद्धरेदात्मनाऽऽत्मानम् ।''

गतशैक्षिकवर्षे विद्यापीठमिदमनेकान् कार्यक्रमान् नूतनपरिकल्पनाश्च समाचरत् । ऐषमः विद्यापीठेऽस्मिन् आयोजिते एकादशे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे अस्माकं छात्राः स्वकीयसर्वाङ्गीणप्रतिभां प्रदर्श्य त्रीणि स्वर्णपदकानि चत्वारि रजतपदकानि, वैजयन्तीमपि जितवन्तः। प्रतिभाप्रामाण्यं दर्शितवतः सर्वानपि छात्रान् विद्यापीठं प्रोत्साहयिष्यति येन ते शोधक्षेत्रेऽपि स्वकीय-प्रतिभाप्रदर्शनेन संस्थामेनां समृद्धां सम्पादयिष्यन्ति । विद्यापीठस्य इदं महत्तरमुत्तरदायित्वं भवति यदिदं संस्कृतस्य दीर्घकालिक-विकासाय प्रतिभावतामीदृशच्छात्राणां प्रतिभां सम्पोषयेत् ।

इदं विद्यापीठं गतवर्षे चत्वारि शोधप्रकाशनानि आनयत् । तेषु च पाणिनीयव्याकरणोदाहरणकोशौ द्वौ, आन्ध्रभाषायां लीलावतीबीजगणितम्, श्रीशङ्कराचार्याणां शारीरिकभाष्यञ्च । विद्यापीठमिदं स्वकीयप्रभावि-भाविपरियोजनायाम् आधुनिकग्रन्थानां संस्कृतभाषानुवादं तथा अप्रकाशितबहुमूल्यमातृकासम्पादनमपि लक्ष्यतया निर्दिशति । अस्माकं विद्यापीठं चतुस्सहस्रपरिमितमातृकासंग्रहेण समृद्धं तथापि अद्य यावत् चतस्रः मातृका एव सम्पादिताः प्रकाशिताश्च, षट् मातृकाः सम्पादनप्रक्रियायां प्रकाशने च अग्रे वर्तन्ते । अहं नवकुलपतीननुरुन्धे यत्ते अस्यां प्रक्रियायां दत्तावधानाः भूत्वा अन्यसंस्थानां साहाय्येन अत्यन्तमुख्यतमप्रधानमातृकाः चित्वा तासां सम्पादनप्रकाशनमाध्यमेन शोधकार्यम् अग्रे नयन्त्विति । एतदर्थं राष्ट्रियमातृकासंग्रहालयस्य भारतसर्वकारसंस्कृतिमन्त्रालयस्य चार्थिकसहकारः स्वीकर्तुं शक्यः । अस्माकं विद्यापीठं ''भारतवाणी पोर्टल् प्रोजेक्ट''द्वारा इमान् ग्रन्थान् सर्वासां भारतीयभाषाणां वाङ्मये, सर्वस्याः जनतायाः विज्ञानार्थं सङ्कल्पिते समर्पणकर्मणि विशिष्टं योगदानं कर्तुं नितान्तं परिश्राम्यति । एतदर्थं विद्यापीठेन केन्द्रीयभारतीयभाषासंस्थया मैसूरस्थया ऐषमः जनवरीमासे अष्टादशे दिनाङ्के एम्.ओ.यु.मध्ये हस्ताक्षरं विहितम् ।

अस्माकं विद्यापीठं दक्षिणभारतराज्येषु केन्द्रीयविद्यालयानां स्वायत्तविद्यालयानां च संस्कृताध्यापकानां कृते सेवाप्रशिक्षणं प्रदातुं कटिबद्धमास्ते । इतोऽपि प्राथमिकविद्यालयस्तरे संस्कृतभाषाध्ययनं पुष्णातुम् अध्यापकान् प्रशिक्षितान् कर्तुं समुचितयोजनारचने तत्परमास्ते । अहं दृढं विश्वसिमि यत्कार्यदक्षाणां नवकुलपतीनाम्, प्राध्यापकानाम्, शिक्षणेतरकर्मचारिणां च सहयोगेनास्माकं विद्यापीठं भाविषु वर्षेषु विशिष्टं सर्वाङ्गीणविकासं प्राप्स्यतीति ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।''





## दीक्षान्तसमारोहे महामहोपाध्यायोपाधिभाजः



**पण्डितश्रीजगन्नाथशास्त्रितैलङ्गमहाभागाः**

महानुभावाः इमे भारतराष्ट्रपतिसभाजिताः, कर्णाट-नेडलूरुमण्डलान्तर्गत 'यसरगट्टा'जनपदवासिनां, काशीनरेशास्थानपण्डितचराणां, मानवल्लीवंशतिलकायमाननां, गौतमगोत्रसमुद्भवानां महामहोपाध्यायपण्डितलक्ष्मणशास्त्रिमहाभागानां कुमारमणयः, श्रीमत्याः सावित्रीबाई इत्याख्यायाः गर्भशुक्तिमुक्ताफलायमानाः 15.03.1935 क्रीस्ताब्दे लब्धजन्मानः, विविधपुरस्कारभाजः, यजुर्वेदमधीत्य आपस्तम्बसूत्रमाकलय्य, ग्रन्थालयशास्त्र्युपाधिमधिगत्य वाराणस्यां पञ्चविंशतिवर्षाणि अध्यापनलेखनशोधमार्गदर्शनादिरताः ईशावास्योपनिषदित्याद्युपनिषदां व्याख्यानं वीरशैवभाष्यं हिन्द्यनुवादसहितं, नाट्यशास्त्रमभिनवभारतीसहितम्, छन्दोमञ्जरी, अलङ्कारमञ्जरी, चन्द्रालोकरहस्यम् इत्यादि ग्रन्थान् विरच्य साहितीवधूटीकिरीटयमाणाः अखिलविद्वत्परिषत्सु लब्धयशस्काः भवन्ति ।



**ब्रह्मश्री डॉ.चिन्तलपाटिपूर्णानन्दशास्त्रिमहाभागाः**

ब्रह्मश्रीवेङ्कटेश्वरसिद्धान्तिनां श्रीमत्सरस्वतीदेवीनाम् औरसाः श्रीचिन्तलपाटिपूर्णानन्दशास्त्रिणः 16-04-1949 तमे दिनाङ्के जनिमलभन्त । व्याकरणशास्त्रनिपुणा इमे पेदकल्लेपल्लिग्रामस्य उन्नतपाठशालायां संस्कृताध्यापकपदवीं, पश्चात् नेल्लूरु (धान्यपुरी) वेदसंस्कृतपाठशालायां व्याख्यातृपदं, प्रवाचकपदं च विभूष्य, प्राचार्यपदं निरुह्य सम्प्रति विश्रान्ताः सततविततानेककृतयः 'समासपारिजातः','आन्ध्रे तीर्थपर्वधर्मसंग्रहः','रामसुधायाः व्याख्या' इत्यादीन् अनेकान् ग्रन्थान् अरीरचन् । अद्वैतवेदान्त-अलङ्कारशास्त्र-ज्योतिषादिशास्त्रेष्वपि एतेषां सफलीकृतपरिश्रमोऽनुभूयते । श्रीमन्तः इमे शृङ्गेरीशारदापीठाधिपतीनां जगद्गुरूणां श्रीभारतीतीर्थश्रीचरणानां सन्निधौ आयोजितासु गणपतिवाक्यार्थसभासु पञ्चाशीत्युत्तरैकोनविंशवर्षात् प्रतिवर्षं भागं गृह्णन्तः ''व्याकरणविद्वान्'' इति बिरुदेन स्वर्णाङ्गुलीयकेन सम्मानिताः । महीशूर-श्रीगणपतिसच्चिदानन्दस्वामिनां समक्षं दत्तपीठे श्रीराणीकृष्णमूर्त्ति-शास्त्रिपरिषदा ''शास्त्राचार्य''गौरवोपाधिना, तथैव अन्याभिः संस्थाभिः व्याकरणभास्करः, नव्यव्यासः इत्यादिभिः बिरुदैश्च सभाजिता इमे शोभन्तेतराम् ।



**ब्रह्मश्री नल्लगोण्ड पुरुषोत्तमशर्ममहाशयाः**

श्रीमन्तो नल्लगोण्डपुरुषोत्तमशर्ममहोदयाः पुण्यदम्पत्योः श्रीमतोः चण्टम्मा-चण्टय्यशास्त्रिनामधेययोः औरसाः 15-08-1946 तमे दिनाङ्के लब्धजन्मानः अधीतन्यायशास्त्रग्रन्थाः, आन्ध्रभाषाद्राविडभाषादक्षाः स्नातकोपाधिं सम्प्राप्य शिक्षकप्रशिक्षणं सम्पाद्य करीमनगरमण्डलान्तर्गतेषु गोदावरीखनि-सिरिसिल्ला-इत्यादिषु उन्नतविद्यालयेषु सप्तवर्षाणि आन्ध्रसाहित्यमध्याप्य 1976 तमे वर्षे वेमुलवाटिकायां श्रीराजराजेश्वरसंस्कृतकलाशालायां न्यायशास्त्रोपन्यासकत्वेन शतशः विद्यार्थिनः अध्यापितवन्तः । काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्, न्यायसिद्धान्तमुक्तावलीसम्पादनम्, साहित्ये व्यक्तिविवेकव्यञ्जनाविचारः, न्यायशास्त्रप्रयोजनम्, छन्दोभाष्यम्, वेदः शास्त्रं चेति नैका ग्रन्थाः एतैः ग्रथिताः ।

**एतेषां महनीयकीर्त्तिविभूषितानां विदुषां कृते महामहोपाध्यायोपाधिं प्रदाय विंशतितमो दीक्षान्तसमारोहः सफलीकृतः ।**

## दीक्षान्तसमारोहे वाचस्पत्युपाधिभाजः

### ब्रह्मश्रीसामवेदं वेङ्कटषण्मुखशर्ममहाभागाः

श्रीमतोः रमणम्मा-श्रीसामवेदंराममूर्त्तिशर्मदम्पत्योः पुत्राः 1967 क्रिस्ताब्दे ओडिशाराज्यस्य गञ्जामजिल्लायाम् आस्काग्रामे लब्धजन्मान इमे आतारुण्यम् आध्यात्मिकप्रवचनपाटवं प्रकाशयन्तः विपुलयशः समार्जयन् । तेषां प्रवचनेषु रुद्रनमकम्, विष्णुसहस्रनामस्तोत्रम्, शिवानन्दलहरी, ललितासहस्रनामस्तोत्रम् इत्यादीनि प्रसिद्धानि । शिवपदम्, शिवलीलार्णवतरङ्गाः, विष्णुविद्या, अन्नमाचार्यपदकवितामाधुरी इत्यादयः ग्रन्थाः एतैः रचिताः । इमे आर्षपरम्परा-सम्पोषकः, आध्यात्मिकसरस्वती, प्रवचनविरिञ्चिः, आर्षधर्मोपन्यासकेसरी, वाग्देवीवरदपुत्रः, विद्यावाचस्पतिः, अभिनवषण्मतप्रतिष्ठापनाचार्य इत्यादिभिः नैकैरुपाधिभिः विभूषिताः विराजन्ते ।





### डॉ.चान्दकिरणसलूजामहाभागाः

श्रीयुतकमलारानी-भोजराजसलूजमहाशयाभ्यां लब्धजन्मानः हिन्दीभाषा-राजनीतिशास्त्र-भाषाशास्त्रकुशलाः इमे प्रशिक्षणे, अध्यापने, शोधकार्येषु, मानवाधिकारविषयेषु, शिक्षायाः न्यायप्रविधिषु, शिक्षामूल्याङ्कनप्रविधिषु च स्वीयाभिनिवेशं प्रदर्शयन्तः, साफल्यमधिगतवन्तः निगूढज्ञानेन अनुभवेन च परिपूर्णाः सी.बी.एस्.सी. इत्यस्य संस्कृतपाठ्यपुस्तकसमितेः सञ्चालकतां प्रबन्धसमितेः सदस्यतां, हरियाणाशैक्षिकप्रबन्धसमितेः, अमेरिकासंयुक्त-राष्ट्राणां, संस्कृतभारत्याः संस्कृतग्रन्थसमितेश्च परामर्शकताम्, एल्.एम्.सि इत्यस्याः अन्ताराष्ट्रियमाध्यमिकशिक्षाप्रबन्धस्य सदस्यतां च सम्पाद्य सुरभारतीभूषिताः भवन्ति ।

**एवमनयोः विद्वत्तल्लजयोः कृते ''वाचस्पतिः'' इत्युपाधिः दीक्षान्तसमारोहावसरे समर्पित इति हर्षप्रकर्षस्य विषयः ।**

## स्वर्णपदकभाजः स्नातकाः

विद्यापीठस्य वार्षिकपरीक्षासु आचार्य-शास्त्रि-प्राक्शास्त्रिस्तरेषु साहित्य-व्याकरण-फलितज्योतिष-धर्मशास्त्र-आगम-वेदभाष्य-पुराणेतिहास-शाब्दबोधादिशास्त्रेषु कृतभूरिपरिश्रमाः लब्धप्रतिष्ठाः विंशतिच्छात्राः स्वर्णपदकभाजोऽभूवन् । तेषु छात्रेषु –

(1)सोममण्डलः (अद्वैतवेदान्ताचार्ये) (2) एम्.रेवतीसुप्रजा (साहित्याचार्ये) (3) जी.श्रीनागलक्ष्मी (शास्त्रीस्तरे), (4) पञ्चाङ्गम् सिन्धुजा (प्राक्शास्त्रीस्तरे) (5) किरणभट्टः (साहित्ये) (6) बी.जनार्दनः (सांख्ययोगाचार्ये) (7) व्यसखान के.बी. (फलितज्योतिषे) (8) देवाशिषपौल (विशिष्टाद्वैतवेदान्ते) (9) अनन्तपुरम् महेशः (आगमाचार्ये) (10) पि.एस्.फणीद्रः (न्यायाचार्ये) (11) नेलेशगुप्ता (शास्त्रीस्तरे व्याकरणे) (12) पूजारिकिशोरः (शास्त्री-आगमे) (13) एन्.रञ्जनपुरोहितः(शास्त्री-वेदभाष्ये) (14) दुर्गाशरणरथः (वेदभाष्याचार्ये) (15) मधुसूदन डी.भट्टः (विशिष्टाचार्ये वेदभाष्ये) (16) ए.रजिता (व्याकरणाचार्ये) (17) मूलकला रामाञ्जनेयुलुः (मीमांसाचार्ये) (18) पद्मालयापात्रः (पुराणेतिहासाचार्ये) (19) क्यामेलिया गुहा (शाब्दबोधस्नातकोत्तरे) (22) शुभलक्ष्मीपण्डा (धर्मशास्त्राचार्ये) प्रमुखाः सन्ति ।

## विविधोपाधिभाजां छात्राणां संख्या

| | | | |
|---|---|---|---|
| 1) विद्यावारिधिः | 48 | 7) एम्.ए. (हिन्दी) | 07 |
| 2) विशिष्टाचार्यः | 67 | 8) एम्.ए.(आइ.एम.टि.) | 04 |
| 3) विशिष्टाचार्यः (शिक्षाशास्त्रम्) | 09 | 9) शास्त्री (बी.ए.) - 128 + 23 | 151 |
| 4) आचार्यस्तरे - 184 + 199 | 383 | 10) बी.एस्.सी. | 15 |
| 5) एम्.ए. (शाब्दबोधः) | 01 | 11) शास्त्री (वेदभाष्यम्) | 09 |
| 6) एम्.एस्.सी. | 06 | | |

*मनसैवेदमाप्तव्यम्। कठोपनिषत् २.१.११ :: By mind alone this (Brahman) could be obtained.*



## एकादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः
**31-01-2017 तः 01-02-2017 यावत्**



एकादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहो महता वैभवेन 30.01.2017 तः 02.02.2017 पर्यन्तं विद्यापीठप्राङ्गणे सञ्चालितः । भारतदेशस्य विविधराज्यानां 22 संस्कृतानुष्ठानेभ्यः 259 प्रतिभागिनः विविधासु स्पर्धासु भागं गृहीत्वा स्वीयप्रतिभायाः प्रदर्शनमकुर्वन् ।

कार्यक्रमस्य उद्घाटनसत्रे विद्यापीठस्य कुलपतयः प्रो.वी.मुरलीधरशर्ममहोदयाः अध्यक्ष्याः, राजमहेन्द्रनगरात् समागताः राष्ट्रपतिसम्मानभाजः महामहोपाध्यायाः गौतमीविद्यापीठस्य प्राचार्यचराः श्री.विश्वनाथगोपालकृष्णशास्त्रिवर्याः मुख्यातिथयः आसन् । अस्मिन्नेव शुभावसरे वैदिकविश्वविद्यालयस्य कुलपतयः प्रो.का.ई.देवनाथन् महोदयाः सारस्वतातिथिरूपेण समुपस्थिताः । पूज्यपूजाविधानानुसारं शैक्षिकसङ्घायप्रमुखाः प्रो.आर्.एल्.एन्.शास्त्रिवर्याः आगतेभ्यः अतिथिभ्यः आदौ स्वागतं व्याहरन् । विद्यापीठस्य कुलपतयः, मुख्यातिथयश्च स्वीयवचोभिः प्राचीनग्रन्थाध्ययनपरम्परायाः संरक्षणमित्यमुं विषयमाधारीकृत्य विशिष्टं व्याख्यानं प्रास्तुवन् । सभान्ते वाग्वर्धिनीपरिषदः सहसंयोजकः डा.भारतभूषणरथः धन्यवादमदात् । अन्ते राष्ट्रगीतेन सभा सम्पन्ना । ततः परं दिनत्रयं यावत् विविधाः स्पर्धाः सञ्चालिताः । तत्र पुरस्कारविजेतॄणां सूची इत्थं वर्तते –

### स्पर्धायां विजेतृनामानि

**स्पर्धानाम — अन्त्याक्षरी**

| | |
|---|---|
| प्रथमः | मध्येशभट्टः, पूर्णप्रज्ञविद्यापीठम् |
| द्वितीयः | शिवशङ्कर होता, राष्टियसंस्कृतविद्यापीठम्, तिरूपतिः |
| तृतीयः | सूर्या हेवार ए., राजीवगान्धिपरिसरः, शृङ्गेरी |
| चतुर्थः | स्वेथा जि.एस्., राजीवगान्धिपरिसरः, शृङ्गेरी |

**स्पर्धानाम — संस्कृतगीतानि**

| | |
|---|---|
| प्रथमः | वेदभाष्य भट्टः,एम्.एस्.पि.संस्कृतमहाविद्यालयः,उडुपि |
| द्वितीयः | कस्मा कमात् के., राजीवगान्धिपरिसरः, शृङ्गेरी |
| तृतीयः | चन्द्रमा पौदाल, के.जे.एस.संस्कृतविद्यापीठम्, मुम्बाई |
| शान्त्वना | प्राचिभट्टः कविकुलगुरुकालिदाससंस्कृत विश्वविद्यालयः, रामटेक नागपूरः |

**स्पर्धानाम — एकपात्राभिनयः**

| | |
|---|---|
| प्रथमः | अहल्या ए.भट्टः, राजीवगान्धिपरिसरः, शङ्गेरी |
| द्वितीयः | विनोद शर्मा, लक्ष्नौपरिसरः, लक्ष्नौ |
| तृतीयः | गौरी सन्टेकः, कविकुलगुरु कालिदास संस्कृतविश्वविद्यालयः, रामटेकनागपूरः |
| शान्त्वना | प्रवीर जे.पि.भट्टः, एस्.एम्.एस्.पि.संस्कृतमहिद्यालयः, उडुपि |

**स्पर्धानाम — वेदभाषणम्**

| | |
|---|---|
| प्रथमः | उत्तमघोषः, रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः |
| द्वितीयः | शिवशङ्कर होता, राष्टियसंस्कृतविद्यापीठम्, तिरुपतिः |
| तृतीयः | भि.सि.शाङ्गरञ्जन्, श्री अहोविलमठादर्शसंस्कृतमहा-विद्यालयः, मधुरान्तकम् तामिलनाडु |
| शान्त्वना | किशोर इउ.कुलकर्णि, पूर्णप्रज्ञविद्यापीठम् |

**स्पर्धानाम — ज्यौतिषभाषणम्**

| | |
|---|---|
| प्रथमः | विघ्नेश लायर, के.जे.सोमाइया संस्कृतविद्यापीठम्, मुम्बाइ |
| द्वितीयः | अङ्गद पि.एस्., राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| तृतीयः | कुन्दनकुमार झा, भोपालपरिसरः, भोपालः, मध्यप्रदेशः |
| | उमेश होल्ला इउ, एस्.एम्.एस्.पि.संस्कृतमहाविद्यालयः, उडुपि |

**स्पर्धानाम — मीमांसाभाषणम्**

| | |
|---|---|
| प्रथमः | कृष्णचार्य पुरोहितः, पूर्णप्रज्ञ विद्यापीठम् |
| द्वितीयः | आलोकचन्द्रपरिडा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| तृतीयः | टि.के.कौशिक राउस्, एम्.एस्.पि.संस्कृतमहाविद्यालयः, उडुपि |
| शान्त्वना | दिव्येन्दु सित्, रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः |

**स्पर्धानाम — साहित्यभाषणम्**

| | |
|---|---|
| प्रथमः | किरणभट्टः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| द्वितीयः | सूर्य हेव्वार ए., राजीवगान्धिपरिसरः, शृङ्गेरी |
| तृतीयः | श्रीवल्लि एम् हेच्., एस्.एम्.एस्.पि.संस्कृतमहिद्यालयः, उडुपि |
| शान्त्वना | साइवाल आचार्यः, रामकृष्णमिशनविवेकानन्द विश्वविद्यालयः, पश्चिमवङ्गः |

**स्पर्धानाम — पुराणेतिहासः**

| | |
|---|---|
| प्रथमः | जोशि सहदेव पि, ब्रहमश्रीसंस्कृतमहाविद्यालयः, गुजराटः |
| द्वितीयः | अलोक चन्द्र परिडा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| तृतीयः | वाणि मञ्जुनाथः हेच्, राजीवगान्धिपरिसरः, शृङ्गेरी |
| शान्त्वना | विभाकुमारी एस्., एम्.एस्.पि.संस्कृतमहाविद्यालयः, उडुपि |

**स्पर्धानाम — न्यायभाषणम्**

| | |
|---|---|
| प्रथमः | विदिशा नागाश्याम पि., पूर्णप्रज्ञविद्यापीठम् |
| द्वितीयः | के.एस्.आर.चक्रवर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| तृतीयः | एस्.वेङ्कटरमणः, श्रीअहोविलमठआदर्श संस्कृतमहाविद्यालयः, मधुरान्तकम्, तामिलनाडु |
| | पार्थसारथि ग्रिस्मा एम्.एस., गुरुवायुरपरिसरः, केरला |

*मा युष्महि मनसा दैव्येन। अथर्ववेदः ७.५२.२ :: Let us not depart from the divine mind.*

**स्पर्धानाम — साङ्ख्य-योगभाषणम्**

प्रथमः मृत्युञ्जयशास्त्री, एस्.एम्.एस्.पि.संस्कृतमहिद्यालयः, उडुपि
द्वितीयः एस्.एम्.प्रणवः, पूर्णप्रज्ञविद्यापीठम्
तृतीयः शिवशङ्करहोता, राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः
शान्त्वना तथागतमण्डलः, रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः

**स्पर्धानाम — व्याकरणभाषणम्**

प्रथमः मधुसूदनभट्टः, पूर्णप्रज्ञविद्यापीठम्
द्वितीयः रामचन्द्र रेजमि, श्रीला.ब.शा.राष्ट्रिय सं.विद्यापीठम्, नवदेहली
तृतीयः कृष्णगोपालपात्रः, रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः
शान्त्वना सुकान्तप्रामाणिकः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः
द्वीपज्योति देवः, गुरुवायूरपरिसरः, पुरानाटुकरा, केराला

**स्पर्धानाम — एकाङ्कनाटकम्**

प्रथमः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः
द्वितीयः एस्.एम्.एस्.पि.संस्कृत महिद्यालयः, उडुपि
तृतीयः राजीवगान्धिपरिसरः, शृङ्गेरी
शान्त्वना सर्वकारीयसंस्कृतमहाविद्यालयः, त्रिपुनिथुरा

**स्पर्धानाम — वेदान्तभाषणम्**

प्रथमः के.मनोज्ञा राष्ट्रियसंस्कृतविद्यापीठ्, तिरूपतिः
द्वितीयः सुप्रियगोस्वामि, रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः
तृतीयः गीरिराज उपाध्यायः, एस्.एम्.एस्.पि.संस्कृत महिद्यालयः, उडुपि
शान्त्वना राजेश कुमारः, वेदव्यासपरिसरः, काङ्गरा, हिमाचलप्रदेशः

**स्पर्धानाम — धर्मशास्त्रभाषणम्**

प्रथमः शुभङ्करदासः, रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः
द्वितीयः इतुस्मिता विधरः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा
तृतीयः एस्.रामतिरुमलारेड्डि, राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः
महेश्वरी एच्., राजीवगान्धिपरिसरः, शृङ्गेरी

**स्पर्धानाम — समस्यापूर्तिः**

प्रथमः सूर्य हेव्वार ए., राजीवगान्धिपरिसरः, शृङ्गेरी
द्वितीयः मध्यश्च भट्टः, पूर्णप्रज्ञविद्यापीठम्
तृतीयः श्रीहर्ष भट्टः, एस्.एम्.एस्.पि.संस्कृतमहिद्यालयः, उडुपि
शान्त्वना प्रशान्तगायनकरः, एस्.एम्.एस्.पि.संस्कृतमहिद्यालयः,उडुपि

**स्पर्धानाम — रसप्रश्नः**

प्रथमः कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेक
द्वितीयः एस्.एम्.एस्.पि.संस्कृतमहिद्यालयः, उडुपि
तृतीयः आर्.एस्.संस्थान्, लखनऊपरिसरः, लखनऊ
शान्त्वना राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः
आर्.एस्.संस्थान, गुरुवायुरपरिसरः, पुरानाटुकरा, केराला

**स्पर्धानाम — लोकनृत्यम्**

प्रथमः सूर्य हेव्वार ए., अनिरुद्धः आर्.कोण्डि
आर्.एस्.संस्थानम्, राजीवगान्धिपरिसरः, शृङ्गेरी
द्वितीयः शिवशङ्करहोता, अङ्गदपि.एस्
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः
तृतीयः कृष्णगोपालपात्रः, सुप्रियगोस्वामि
रामकृष्णमिशनविवेकानन्दविश्वविद्यालयः, पश्चिमवङ्गः



## विजयवैजयन्त्या विभूषितं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठम्





फरवरी मासस्य द्वितीयदिनाङ्के प्रातः एकादशवादने समापनसमारोहः समनुष्ठित आसीत् । परमसम्माननीयाः राष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतयः पद्मभूषणसम्मानिताः श्री.एन्. गोपालस्वामिमहोदयाः, मुख्यातिथयः आसन् । संस्कृतप्रचारः प्रसारश्च तेषां भाषणस्य प्रमुखोद्देश्यमासीत् । तथैव पुरातनतालपत्राणां मुद्रणाय ते प्राबोधयन् । तदनन्तरं राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो. वि.मुरलीधरशर्ममहोदयाः अस्मिन् शुभावसरे सर्वान् पुरस्कारयोग्यान् छात्रान् प्रशंस्य स्वर्णादिपदकम्, प्रमाणपत्रं तथा धनराशिञ्च प्रदत्तवन्तः । वाग्वर्धिनीपरिषदः सहसंयोजकाः डा.ओ.जी.पी.कल्याणशास्त्रिमहोदयाः सर्वेभ्यः धन्यवादान् समार्पयन् । राष्ट्रगीतेन कार्यक्रमः समाप्तिमगात् ।







राष्ट्रियसंस्कृतविद्यापीठ-पण्डिचेरिस्थफ्रेञ्चसंस्थयोः संयुक्ताध्वर्यवे प्रकाशितस्य "पाणिनीयव्याकरणोदाहरणकोशः – तद्धितप्रकरणम्" इति ग्रन्थस्य लोकार्पणं कुलाधिपतिभिः कृतम् ।

अस्मिन् अवसरे संस्कृतविज्ञानप्रदर्शिनीकेन्द्रम्, प्राचीन-लिपीनां प्रदर्शिनीकेन्द्रम्, विद्यापीठप्रकाशनानां प्रदर्शिनीकेन्द्रं च छात्राणां परिदर्शनाय संस्थापितम् । सर्वेऽपि विद्यापीठीयाः शैक्षिकाः, प्राशासनिकाः कर्मचारिणः, छात्राः, अभिभावकाश्च सोत्साहमेताः प्रदर्शिन्यः दृष्ट्वा सन्तुष्टान्तरङ्गाः सञ्जाताः । एवमयम् एकादशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः कुलाधिपति-कुलपति-कुलसचिवादिपदाधिकारिणाम्, तथा विद्यापीठीयान्त-र्वाणीनाम्, कर्मचारिणाम्, छात्राणां च सहयोगेन, अखिलाण्ड-कोटिब्रह्माण्डनायकस्य श्रीवेङ्कटेश्वरस्य परमानुग्रहेण च सुसम्पन्ना इति शम् ।

## मातृभाषादिवसोत्सवः
**21.02.2017**



महतो हर्षप्रकर्षस्य विषयोऽयं यदस्माकं विद्यापीठप्राङ्गणे 21.02.2017 तमे दिनाङ्के मातृभाषादिवसो विद्यापीठस्य वाग्वर्धिनिपरिषत्पक्षतो महता वैभवेन परिपालितः । कार्यक्रमेऽस्मिन् कुलपतयः आचार्याः वी.मुरलीधरशर्ममहोदया आध्यक्ष्यं निर्वहन्तः स्वीयभाषणे मातृभाषाया गौरवं संवर्ण्य सा अस्माकं भारतीयानाम् अमूल्यनिधिरिति समुदघोषयन् । तत्र पारस्परिकभाव- विनिमयार्थं स्नेहसम्पर्कपरिबृंहणार्थं च भाषा प्रधानभूमिकां निर्वहति । अस्मिन् सन्दर्भे सर्वासां भाषाणां जननी या संस्कृतभाषा, तस्याः पठनपाठनपरम्परा तथा प्रचारः प्रसारश्च अस्माकं विद्यापीठे प्रचलति तथा च एतादृशे विद्यापीठे मातृभाषादिवसोत्सवपरि-पालनमपि क्रियत इति हेतोस्तदस्माकं कृते गौरवावहं भवतीति स्वीयाशयं कुलपतयः प्राचीकटन् ।

कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण श्रीवेङ्कटेश्वरविद्यालयस्य आंग्लभाषाविभागाचार्याः श्रीमधुरान्तकं नरेन्द्रमहोदयाः समागत्य स्वीयभाषणे मातृभाषायाः प्राधान्यं प्राकटयन् । तैरुक्तं यत् मातृभाषा जानपदसंस्कृतेः वाहिका भवति । ते UNESCO संस्थया कृतस्य मातृभाषासम्बन्धिसर्वेक्षणं स्मृत्वा समुपास्थापयन् यदागामिनि 2030 ख्रीष्टाब्दाभ्यन्तरे सर्वत्र विश्वे मातृभाषा-माध्यमेनैव विद्याबोधनपरम्परा प्रचलत्विति । यथा विश्वे लुप्तप्रायजीवानां संरक्षणं क्रियते, तथैव मातृभाषायाः संरक्षणं सर्वैः करणीयमिति तेषां भाषणस्य बीजमासीत् । मातृभाषादिवसोत्सवसन्दर्भेऽस्मिन् 12 भाषासु गीतगानम्, वक्तृत्वम् इति विविधाः स्पर्धाः विद्यापीठे समचाल्यन्त । तासु प्रतिस्पर्धासु विजेतृणां कृते अतिथिभिः पुरस्काराः प्रदत्ताः ।

अस्य कार्यक्रमस्य संयोजकाः डॉ.चक्रवर्तिरङ्गनाथन्महोदयाः, तथा च सहसंयोजकाः डॉ.भारतभूषणरथमहोदयाः आसन् । सभान्ते अतिथीनां धन्यवादसमर्पणं डॉ.कल्याणशास्त्रिमहोदयेन कृतम् । सर्वेऽपि विद्यापीठीयाध्यापकाः, कर्मचारिणः, छात्रा कार्यक्रमेऽस्मिन् स्थित्वा सर्वं सफलमकुर्वन् ।

## अवगमनस्मृतिलेखास्तथा योजनाः (MoUs & Schemes)

1. MoU witrh Central Institute of Indian Languages (CIIL), MHRD for converting Hard Copy of Sanskrit Texts into Digitalized Textual Format under "Bharat Vani Project".
2. MoU with "Samskruta Bharati" for digitized Sanskrit Corpus.
3. MoU with Jio Reliance for providing free Internet inside the Vidyapeetha Campus.
4. MoU with Digital Depositories in NAD (National Academi Depository), Govt. of India (UGC).
5. MoU with EdCell for exchanging of foreign students for admission into RSVP Academic Programmes.
6. Implementation of the Scheme of Pdt. Madan Mohan Malaviya National Mission on Subject base Network pertaining to Sanskrit teachers and teaching, sanctioned by the Ministry of HRD, Govt. of India for faculty of Education.
7. Broadcasting of the activities of "Balakendra" running under "Sanskrit Vikasa Kendra" in SVBC Bhakti Channel.

# द्विदिवसीया अखिलभारतीयग्रन्थजातसङ्ग्रहकार्यशाला

**दिनाङ्कः — 20-21/09/2017**



सर्वविदितोऽयं विषयो यत् आधुनिककालेऽस्मिन् व्यवसायात् प्रारभ्य, अनुसन्धानक्षेत्रे, अध्ययनाध्यापनक्षेत्रे, मनोरञ्जनक्षेत्रे च सर्वदा सर्वथा सङ्गणकयन्त्रस्य प्रभावः दृश्यते । अन्तर्जाले तथाविधाः बहवः विषयाः भवन्ति येषामुपयोगः सर्वैः क्रियते । तेषु अध्ययनाध्यापनसामग्री अन्यतमा । विशिष्टतयाऽत्र संस्कृतभाषायाः तया भाषया रचितानां संस्कृत-शास्त्राणां दुर्लभमौलिकग्रन्थाः विविधसंस्थानां जालपुटेषु बहुधा टङ्किताः सन्तः, .pdf, .jpeg, .tif, .psd रूपेण वा समुपलभ्यन्ते । परन्तु तत्र तत्र टङ्कितेषु पाठेषु बहवः दोषाः, पाठभेदाश्च दृश्यन्ते । अतः अन्तर्जाले समुपलब्धानां सर्वेषां ग्रन्थानां पाठानां वा संग्रहणं कृत्वा नवीनतया तत्तद्विषयाणां सम्पादनं कर्तुं संस्कृतविदुषां **''द्विदिवसीयाऽखिलभारतीयग्रन्थजातसङ्ग्रह-कार्यशाला''** अस्मिन् संवत्सरे सितम्बरमासस्य विंशत्येकविंशति-तमदिनाङ्कयोः विद्यापीठस्य प्रशासनभवनसभाङ्गणे नवदेहलीस्थराष्ट्रिय-संस्कृतसंस्थान-बेङ्गलोरस्थ-संस्कृतभारती-तिरुपतिस्थराष्ट्रियसंस्कृत-विद्यापीठानां संयुक्ताध्वर्यवे समायोजिता ।

कार्यक्रमस्यास्य समुद्घाटनसमारोहे श्रीजगद्गुरुरामानन्दाचार्यसंस्कृत-विश्वविद्यालयस्य (राजस्थानस्थस्य) प्राक्तनकुलपतयः **आचार्याः के.वि.रामकृष्णमाचार्युलुमहोदयाः** मुख्यातिथिरूपेण समागच्छन् । सम्मानितातिथिरूपेण संस्कृतभारतीपक्षतः विशिष्टाः वैयाकरणाः **विद्वान् जनार्दन हेगडे महोदयाः** तथा च राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः



**आचार्य पी.एन्.शास्त्रिमहोदया** उपस्थिताः । सन्दर्भेऽस्मिन् कुलपतयः **प्रो.वि.मुरलीधरशर्ममहोदयाः** सभाध्यक्षरूपेण सभां समचालयन् ।

कार्यशालायामस्यां पञ्च सत्राणि कल्पितान्यासन् । तत्र प्रतिसत्रं विविध-संस्थाभ्यः समागताः प्रतिनिधयः संस्कृतग्रन्थजातानां विषये पूर्वकृतानि e-content सम्बद्धकार्याणि प्रस्तूय अग्रिमवर्षेषु करणीयानां कार्याणां विषये विशदचर्च्चाम् अकुर्वन् । अन्तर्जाले समुपलब्धानां संस्कृतग्रन्थजातानां सम्पादने अनुभूयमानाः क्लेशाः, अनुसर्तव्यानि सोपानानि, नवीनप्रविधयः, विषयाणां वर्गीकरणम्, समीकरणम् इत्यादिविषयेऽपि आलोचना विहिता । तत्र प्रथमसत्रे तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य प्रतिनिधयः विद्यापीठस्य गणकयन्त्रविश्लेषकाः बि.चन्द्रशेखरमहोदयाः विद्यपीठेन सम्पादितानां जालपुटनिक्षिप्तानां ग्रन्थानां परिचयमकुर्वन् । ततः राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ; संस्कृतभारती, बेङ्गलोर् ; संस्कृतविकासप्रतिष्ठानम्, दिल्लीति तिस्रः संस्थाः स्वीयकार्यजातं प्रादर्शयन् ।



द्वितीयसत्रे IIT, Kanpur ; Wikipedia Group ; कविकुलगुरु-कालिदाससंस्कृतविश्वविद्यालयः, नागपुरम् ; श्रीलालवहादूरशास्त्रिराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली ; चिन्मयप्रतिष्ठानम्, कोची चेति पञ्च-संस्थाभ्यः प्रतिनिधयः स्वीयाभिप्रायं प्राकटयन् ।

तृतीयसत्रे MIT, Pune ; हैदराबादकेन्द्रीयविश्वविद्यालयः, हैदराबादः; कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलोर् ; मेलकोटेसंस्कृत-अकादमी चेति संस्थानां प्रतिनिधय आसन् ।

कार्यशालायाः द्वितीयदिवसे चतुर्थसत्रे सर्वैः संस्थाप्रतिनिधिभिः समालोचितानां विषयाणां पुनरालोकनं जातम् । ज्ञातव्योऽयं विषयो यत् राष्ट्रियसंस्कृतविद्यापीठेन प्रायशः ५०००, राष्ट्रियसंस्कृतसंस्थानस्य विविधपरिसरसदस्यैः ३७३०१ ; पूर्णप्रज्ञसंशोधनमन्दिरेण ७९२५ ; Academic of Sanskrit Research, Melkote संस्थया ६४२५ ; मधुरान्तकस्थाहोविलमठसंस्कृतमहाविद्यालयेन ६३६८ ; चिन्मय-प्रतिष्ठानेन ४२३८ ; Indian Heritage CDAC, Bangalore इति संस्थया ५८५५ संख्याकाः ई-ग्रन्थाः अन्तर्जालात्सङ्कलिताः, नवीनतया च सम्पादितास्सन्ति ।





**संस्कृतविकिपिडिया** — विकिपिडिया एका मुक्ता जालाधारित-सहकारात्मकबहुभाषीयविश्वकोशपरियोजना । अत्र अन्तर्जाले समुपलब्धाः सर्वेऽपि तत्तद्विषयसम्बद्धाः अंशाः विविधान्वेषकोपकरणेषु (Searching Tools) अन्विष्यमाणे सति सरलतया सहजतया तात्कालिकरूपेण च प्राप्तुं शक्यन्ते । एवमेव विशालसंस्कृतवाङ्मयस्य यथासम्भवं संशोधनं परिष्करणं च कृत्वा टीका-अनुवाद-समालोचनाभिस्सह मौलिकग्रन्थानामन्तर्जालजालपुटे संस्थापनमेव कार्यशालाया अस्याः प्रमुखमुद्देश्यमासीत् ।

येषां ग्रन्थानां तन्त्रलिपिः (Soft Copy) अस्ति तेषां संग्रहः, येषां ग्रन्थानां प्रतिमारूपं (Image Copy) लभ्यते तेषां प्रतिमारूपात् साक्षरपरिवर्तनम् ; अन्तर्जालेऽनुपलब्धानां प्रसिद्धप्रकाशितसंस्कृतग्रन्थानां परिष्कृतटङ्कणम् अथवा पत्रबिम्बग्रहणं कृत्वा ततः साङ्गणिकपद्धत्या साक्षरपरिवर्तनम् ; ततः मार्जनं सम्पादनञ्चेति वैज्ञानिकसोपानानि अत्र विशिष्टतया विविधप्राविधिप्रक्रियाः गणकयन्त्रविशेषज्ञैस्सह परामृष्टाः ।





## शिवानन्दच्छात्रवृत्तिप्रदानमहोत्सवः (शिक्षकदिवसावसरे)





# अनुसन्धातॄणां त्रिदिवसीया राष्ट्रियसङ्गोष्ठी

**दिनाङ्कः - २७-२९, मार्च, २०१७**



राष्ट्रियसंस्कृतविद्यापीठस्य अनुसन्धानप्रकाशनविभागपक्षतः मार्चमासस्य सप्तविंशतितमदिनाङ्कात् ऊनत्रिंशद्दिनाङ्कं यावत् विद्यावारिधिः, विशिष्टाचार्यः इति उपाध्यर्थं कृतानुसन्धानानां शोधच्छात्राणां कृते विद्यापीठस्य रमारञ्जनमुखर्जिसभाङ्गणे समायोजिताऽऽसीदेका त्रिदिवसीया राष्ट्रियसङ्गोष्ठी । अस्याः सङ्गोष्ठ्याः समुद्घाटनं विद्यापीठस्य कुलपतयः आचार्याः वि.मुरलीधरशर्ममहोदयाः अकुर्वन् । अवसरेऽस्मिन् शैक्षिकसङ्कायप्रमुखाः, आचार्य आर्.एल्.एन्.शास्त्रिमहोदयाः मुख्यातिथय आसन् तथा च साहित्यसंस्कृतिप्रमुखाः दूरविद्याकेन्द्रस्य निदेशकाः आचार्य सिएच्.पि.सत्यनारायणमहोदयाः सभां समचालयन् ।

आयोजितायाः सङ्गोष्ठ्याः त्रिषु दिवसेषु द्वादश (१२) सत्राणि सञ्चालितान्यासन्, येषु वेदः, वेदभाष्यम्, आगमः, व्याकरणम्, साहित्यम्, ज्योतिषम्, मातृकाशास्त्रम्, न्यायः, वेदान्तः, शिक्षा, धर्मशास्त्रम्, पुराणेतिहासः, सांख्ययोगः इत्येतानि शास्त्राणि आश्रित्य शोधप्रबन्धाः प्रस्तुताः । विद्यापीठस्यैतेषु विभागेषु ये विभागाध्यक्षाः आसन् ते सत्राध्यक्षरूपेण पत्राणां समीक्षणमकुर्वन् । सत्रेष्वेतेषु प्रायशः अशीत्यधिकानि शोधपत्राणि समुपस्थापितान्यासन् । पाण्डिचेरीतः, काञ्चीपुरतश्च द्वौ छात्रावत्र भागमगृह्णाताम् । श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभागस्यावसरप्राप्ताः आचार्याः प्रो.किशोरचन्द्रमहापात्रमहोदयाः अपि सत्राध्यक्षरूपेण समागत्य शोधच्छात्रान् प्रोत्साहितवन्तः ।

ऐदं प्राथम्येन विद्यापीठद्वारा एतादृशस्य कार्यक्रमस्य समायोजनं कृतमिति सन्तुष्टान्तरङ्गाः कुलपतयः सर्वैः शोधच्छात्रैरेतादृशेषु कार्यक्रमेषु भागमूढ्वा स्वीयानुसन्धानसम्प्राप्तिं लोकलोचनगोचरीकर्तुमुपादिशन् । विद्यापीठेनाग्रिमकालेषु एतादृशा अवकाशाः शोधच्छात्राणां कृते पौनःपुन्येन अवश्यं प्रदास्यन्त इत्यपि तैः प्रतिश्रुतम् ।



## अष्टदिवसात्मिका कार्यशाला
## संस्कृतानुसन्धानाय सङ्गणकानुप्रयोगतन्त्रांशाः

**१०-१७/०४/२०१७**



शोधच्छात्राणां गणकयन्त्रतन्त्रांशेषु नैपुण्यं सम्पादयितुम् अनुसन्धानप्रकाशनविभागपक्षतः नवीनतया **"सङ्गणकानुप्रयोगतन्त्रांशाः"** इति विषयमाधारीकृत्य अष्टदिवसात्मिका कार्यशाला १०.०४.२०१७ दिनाङ्कात् १७.०४. २०१७ दिनाङ्कं यावत् समनुष्ठिताऽऽसीत् । कार्यशालायाः संयोजकरूपेण अनुसन्धानप्रकाशनविभागस्याध्यक्षाः आचार्य विरूपाक्ष वि.जड्डिपालमहोदयाः नियुक्ता आसन् । अत्र चत्वारिंशद्घटिकापरिमिताः कक्षाः समायोजिताः, यासु Hands-on-training रूपेण MS-Office, PPT, Page-Maker, Linux, Latex, Devanagari Key Board Operation, Literary Survey, Indexing, Internet Explorer इत्यादिविषयेषु चर्चाः प्रचलिताः । अस्यां कार्यशालायां प्रायशः पञ्चपञ्चाशच्छोधच्छात्राः भागम् अगृह्णन् । शोधच्छात्राः यथा स्वयं स्वकीयशोधप्रबन्धानां प्रस्तोतुं सङ्गणकमाध्यमेन प्रभवन्ति, तथा च सामग्रीसङ्कलनार्थं अन्तर्जालस्योपयोगः कथं करणीय इत्येतदेव कार्यशालाया अस्याः प्रमुख्यमुद्देश्यमासीत् । विद्यापीठस्य गणकयन्त्रविभागपक्षतः श्रीसेतुरामः, श्रीसङ्कीर्त्तिः, श्रीमती प्रसन्ना तथा अनुसन्धानप्रकाशनविभागस्याध्यापकः डॉ.सोमनाथदाशश्च छात्रान् गणकयन्त्रस्य विविधान् अंशान् अपाठयन् । अनुसन्धानस्यान्ये वरिष्ठा अध्यापका अपि बहुधा मार्गदर्शनमकुर्वन् ।



## डॉ.आर्.चन्द्रशेखरमहोदयानां कृते
# जीवनोपलब्धिपुरस्कारः



महानयं प्रमोदस्यावसरो यदस्माकं विद्यापीठस्य शिक्षाविभागस्य सहाचार्याः डॉ.आर्. चन्द्रशेखरमहोदयाः तेषां निःस्वार्थ-परसमाजसेवा, नारीशक्तिप्रशस्तीकरणम्, अवहेलितजनजातिजनानां विकासः, सामाजिकन्यायः, शिक्षायाः विकासार्थं दृढसङ्कल्पः, शिक्षाप्रातिभमित्येतेषु विषयेषु कार्यदक्षतां दृष्ट्वा तामिलनाडुप्रदेशस्य विल्लुपुरम् जिल्लायाः श्रीविद्योदयशिक्षामहाविद्यालयात् ऐषमः ११.०९.२०१७ दिनाङ्के गुरुदिवसपरिपालनावसरे **LIFE TIME ACHIEVEMENT AWARD** अध्यगच्छन् । तेषामेतादृशसफलतायै सर्वेऽपि विद्यापीठस्य कुलपति-कुलसचिवसमेताः अध्यापककर्मचारिवृन्दाः तानभिनन्दन्ति ।




# संस्कृते ई-कोशः (spokensanskrit.de)

शक्तिग्रहस्य विविधेषु व्याकरणोपमानाप्तवाक्यादिषु उपायेषु **"कोशः"** अन्यतमो भवतीति वाक्यपदीये भर्तृहरिणा उच्यते । यथा —

> शक्तिग्रहं व्याकरणोपमान-
> कोशाप्तवाक्याद्व्यवहारतश्च ।
> वाक्यस्य शेषाद्विवृतेर्वदन्ति
> सान्निध्यतस्सिद्धपदस्य वृद्धाः ॥

सर्वप्राचीनसंस्कृतभाषायाः शब्दकोशोऽतीव विस्तृतः । अत्र वैदिकाः, लौकिकाः, पारिभाषिकाः, नानार्थकाश्चेति बहुविधाः कोशाः लभ्यन्ते । एतेषां कोशानां संग्रहणं कृत्वा सरलया पद्धत्या तात्कालिकरूपेण एकस्मिन् क्षणे शब्दानामर्थान् हिन्दी-आंग्लादीन् अन्वेष्टुमथवा हिन्द्यादिभाषान्तरशब्दानां संस्कृतार्थान्वेषणार्थं च अन्तर्जाले ई-कोशाः बहुधा लभ्यन्ते । तेषामुपयोगः अनुवादप्रक्रियायां सर्वथा कर्तुं शक्यते । एतादृशेषु अन्तर्जालजालपुटेषु spokensanskrit.de इति जालपुटं सम्भाषणसंस्कृतशब्दकोशस्य प्रकृष्टं साधनं भवति ।

केरलराज्यस्य कोचिनस्थनारायणस्वामि-रञ्जिनी वी.वी. के.ग्लासोफमहोदयानामार्थिकसहयोगेन भारत-संयुक्तराष्ट्रामेरिका-हङ्गेरी-स्विज्जरलैण्ड-इटालिदेशेषु प्रसिद्धानां साममोहन-किरणपरञ्जापे-एच्.के.रामप्रियन्-क्लार्क्सविल्ले-गौरव-लुगानो-ए.ग्यालो-टोरिनोप्रमुखाणां मिलितसहयोगेन विकसितं संस्कृतशब्दकोशसम्बन्धिजालस्थानमिदं (Website for Spoken Sanskrit Sabdakosha) द्वयोः भाषयोः (संस्कृतांग्लयोः) अर्थज्ञानार्थमुपयुक्तं भवति । अत्र **372552** (द्विपञ्चाशदधिकपञ्चशतोत्तरद्विसप्ततिसहस्राधिकत्रिलक्षसंख्याकाः) शब्दाः वर्तन्ते ।





# NEWS — As it Happens, Be the First One to know... — NEWS

# Mind of Media on University

## During Jan-Oct, 2017



'Sanskrit traditions can be protected only by institutions'

All India Talent Festival commences on a colourful note

Talent fest begins at RSVP

Rashtriya Sanskrit Vidyapeetha Vice-Chancellor Prof V Muralidhara Sarma felicitating Prof Viswanatha Gopalakrishna Sastry at RSVP in Tirupati on Monday

'Restore Sanskrit to eminence'

1,200 students plant saplings at RSVP

OUR BUREAU

Tirupati: Rashtriya Sanskrit Vidyapeetha (RSVP) organised Paadapa Parva (plantation of trees) programme on Sunday in which more than 1,200 students including the NSS volunteers of seven units took part. Speaking on the occasion, Vice-Chancellor Prof V Muralidhara Sarma said the ecological balance is depends entirely on trees. Unfortunately, people were cutting down the trees largely for commercial operations and due to expansion of cities. To increase the greenery and maintain eco-balance everyone should plant trees, he said. Professor J Ramakrishna said that the programme was aptly named as Paadapa Parva. District Collector PS Pradyumna arranged more than 500 plants for the programme. Another contractor and nature lover Vijaya Raghava Reddy contributed Rs.1 lakh worth plants. Registrar Prof C Uma Sankar, Prof Ch P Satyanarayana, NSS Programme Coordinator Dr Dakshnamurthy Sarma, Dr Medasani Mohan and Dr V Venkata Ramana Reddy participated in the programme.

RSVP V-C Prof V Muralidhara Sarma planting a sapling in the varsity campus in Tirupati on Sunday

సమాజానికి చేరువగా విద్యాపీఠం

సంస్కృత విద్యార్థులకు ఉపాధి అవకాశాలు అందించాలి

- తాళపత్రాలు భద్రపర్చడానికి కాదు... సమాజానికి అందించదానికి
- విద్యాపీఠం చాన్సులర్ ఆచార్య గోపాల స...

త్వరలో వేద శాస్త్ర విజ్ఞాన ప్రదర్శన

వేడుకగా జాతీయస్థాయి సంస్కృత ప్రతిభా ఉత్సవాలు

జ్యోతి వెలిగించి కార్యక్రమాన్ని ప్రారంభిస్తున్న విశ్వరాధగోపాలకృష్ణ శాస్త్రి

విద్యాపీఠంలో యూఎస్‌ఏ పరిశోధకులు

ధ్యానంతో మానసిక ప్రశాంతత

శాస్త్ర పరిరక్షణతోనే భారత వికాసం

11ம் ஆண்டு சமஸ்கிருத திறனறிதல் போட்டிகளில்

வித்யா பீட மாணவர்கள் மீண்டும் சாம்பியன்

திருப்பதி வித்யா பீடத்தில் நடந்து வந்த சமஸ்கிருத திறனறிதல் நிகழ்ச்சிக்கான பல்வேறு போட்டிகளில் வெற்றி பெற்ற வித்யா பீட மாணவர்களுக்கு வேந்தர் கோபால்சாமி ஒட்டுமொத்த சாம்பியனுக்கான ஜெயந்தி சுழல் கோப்பையை வழங்கினார்.

శాస్త్ర విజ్ఞానంతోనే ప్రపం...

వైభవం.. 'సంస్కృత' ఉత్సవం

సంస్కృతికి ప్రతిబింబం.. సాంస్కృతిక సంబరం!



२०१७ तमे वार्षिकमहोत्सवे आगमविदुषां सिएच्.तिरुमलाचार्युलुमहोदयानां सम्माननम्



२०१७ तमे वार्षिकमहोत्सवे आगमविदुषां एन्.ए.के.सुन्दरवरदन्महोदयानां सम्माननम्



२०१७ तमे वार्षिकमहोत्सवे आगमविदुषां ए.रामकृष्णशास्त्रिमहोदयानां सम्माननम्



''पद्मभूषण-महामहोपाध्याय-नावल्पाक्क शठकोप रामानुजताताचार्यशैक्षिकभवनम्'' इति शैक्षिकभवनस्य नवीननामकरणम्

# संस्कृतसप्ताहमहोत्सवः



श्रावणशुक्लत्रयोदशीतः श्रावणकृष्णचतुर्थीपर्यन्तं (04-08-2017 तः 10-08-207) विद्यापीठप्राङ्गणे तथा च तिरुपतिनगरस्य विविधविद्यालयेषु महता वैभवेन संस्कृतभाषायाः प्रचारप्रसारार्थं संस्कृतसप्ताहमहोत्सवः परिपालितः । कार्यक्रमाङ्गतया विविधाः सांस्कृतिक-शैक्षिकस्पर्धाः, जातीयसङ्गोष्ठी, कविसम्मेलनम्, श्रीमद्भगवद्गीताष्टावधानकार्यक्रमः, भजनसन्ध्या, रसप्रश्नः, शोभायात्रादयः नैकेंऽशाः चित्ताकर्षका आसन् ।

महोत्सवस्योद्घाटनं 04.08.2017 तमे दिनाङ्के अपराह्णे चतुर्वादने अन्तर्दौवारिककेन्द्रे कुलपतीनां प्रो.मुरलीधरशर्म-महोदयानामाध्यक्ष्ये विहितम् । शुभावसरेऽस्मिन् श्रीजगद्गुरुरामा-नन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरा **आचार्याः के.वि. रामकृष्णमाचार्युलु**महाभागाः मुख्यातिथिरूपेण समाहूताः संस्कृतसप्ताहकार्यक्रमस्य परिपालनोद्देश्यं विज्ञाप्य रक्षाबन्धनस्य महत्त्वं चोद्घोष्य स्वीयसरलगुरुगम्भीरसंस्कृतवचोभिः छात्रान् प्राबोधयन् । संस्कृतसप्ताहकार्यक्रमस्याध्यक्षाः **आचार्याः एम्.एल्.नरसिंहमूर्त्ति**महाभागा कार्यक्रमविवरणप्रदानपूर्वकं महोत्सवोद्देश्यं समुदघोषयन् । उद्घाटनसत्रस्य सञ्चालनं संस्कृत-सप्ताहमहोत्सवसमितिसंयोजकाः डॉ.चक्रवर्तिरङ्गनाथन्महोदयाः निरवहन् । सभान्ते डॉ.सोमनाथदाशमहोदयाः सर्वेषामतिथीनां कृते धनवादान् समार्पयन् । क्रमानुसारं कार्यक्रमाः यथा —

### (1) पद्यवाचनानुगुणं चित्रलेखनम्

**(दिनाङ्कः ०४-०८-२०१७, सायं ०५.००वादने)**

उद्घाटनसत्रेण सह द्वितीयसत्रस्यायोजनं तत्रैव विहितम् । तत्र ''पद्यवाचनानुगुणं चित्रलेखनम्'' इति कार्यक्रमे तिरुपतिनगरस्य विशिष्टचित्रशिल्पिनः **श्रीसिङ्गंपल्लि सत्यनारायणमहोदयाः** प्रेक्षावतां मनोरञ्जका आसन् । अस्माकं विश्वविद्यालयस्य साहित्यविभागा-चार्यचराणाम् **आचार्यकोम्पेल्लरामसूर्यनारायण**महोदयानां पद्यश्रवणसमनन्तरमेव तात्कालिकरूपेण चित्रत्रयं निर्माय श्रीसत्यनारायणमहोदयाः स्वीयचित्ररचनाकौशलं प्रादर्शयन् ।

प्रथमश्लोकः —

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ।।

द्वितीयश्लोकः —

दोर्भिर्युक्ताश्चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमाना समाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ।।

तृतीयश्लोकः —

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि ।।







### (2) कवितासंगोष्ठी

**(दिनाङ्कः 05-08-2017, अपराह्णे - 04.00 वादने)**

साहित्यविभागस्याचार्याणां श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयस्य कुलपतिचराणाम् आचार्यसन्निधानं सुदर्शन शर्ममहोदयानाम् आध्यक्ष्ये रमारञ्जनमुखर्जीसभाङ्गणे काव्यकुशलकुलपतिसमेताः त्रयोदश (13) अध्यापकाः, छात्राश्च स्वीयमधुरमधुमयं काव्य-कौतुकं समुपास्थापयन् । सङ्गोष्ठ्या अस्याः सञ्चालनं डॉ.सोमनाथ-दाशेन विहितम् ।

### (3) विद्यापीठच्छात्राणां शैक्षिकसांस्कृतिकस्पर्धाः

**(दिनाङ्कः 06-08-2017)**

विद्यापीठस्य सर्वेषामन्तेवासिनां प्रतिभाविकासार्थं विविधाः शैक्षिकसांस्कृतिककार्यक्रमाः परिचालिताः । तत्र कार्यक्रमेषु शब्दकण्ठपाठः, धातुकण्ठपाठः, रघुवंशश्लोककण्ठपाठः, आशुभाषणम्, आदित्यहृदयस्तोत्रकण्ठपाठः, गीतगानस्पर्धा, भगवद्गीताकण्ठपाठः, शास्त्रार्थस्पर्धा इत्यादयः प्रसिद्धाः सन्ति । चत्वारिंशदधिकैकशतसंख्याकाः (140) छात्राः स्पर्धासु एतासु भागमगृह्णन् पुरस्कारभाजश्च पुरस्कृताः ।





### (4) श्रीमद्भगवद्गीतोत्सवः

**(दिनाङ्कः 07-08-2017, अपराह्णे - 3.00 वादने)**

स्वामि-**अनुपमानन्द**वर्याणामाध्यक्ष्ये रमारञ्जनमुखर्जिसभाङ्गणे श्रीमद्भगवद्गीतामाधारीकृत्य अष्टावधानकार्यक्रम आयोजितः । अत्र अष्टावधानिरूपेण शिक्षाविभागस्य सहायकाचार्याः डॉ.सच्चिदानन्दमूर्त्तिमहोदयाः स्वीयम् अवधानकौशलं प्रादर्शयन् । कार्यक्रमस्यास्य सञ्चालिका डॉ.पारमितापण्डामहोदया आसन् । अष्टावधानकार्यक्रमसमनन्तरमेव विद्यापीठस्य छात्राः, अध्यापकाः, कर्मचारिणश्च सर्वेऽपि श्रीमद्भगवद्गीतायाः पारायणमकुर्वन् ।

### (5) भजनसन्ध्या

**(दिनाङ्कः 07-08-2017, सायं - 6.00 वादने)**

कार्यक्रमेऽस्मिन् विद्यापीठीयच्छात्राणां मधुरभजनगीतविन्यासः श्रवणपेयोऽभवत् । अत्र शिक्षाविभागाचार्याः आचार्य आर्.प्रह्लाद-जोशीमहोदयाः आध्यक्ष्यं कृतवन्तस्तथा च डॉ.के. कादम्बिनी-महाभागाः सञ्चालिका आसन् ।

### (6) राष्ट्रियशास्त्रीयसङ्गोष्ठी

**(दिनाङ्कः 08-08-2017, प्रातः 10.00 वादनतः)**

अस्मिन् सत्रे ''विभिन्नदर्शनेषु मोक्षस्वरूपम्'' इति विषयमधिकृत्य सङ्गोष्ठी सञ्चालिता । विद्यापीठीयास्तदितर-शिक्षासंस्थानां च विद्वांसः, शोधच्छात्राः, समुपस्थाय स्वीयप्रबन्धान् प्रास्तुवन् । अस्याः सङ्गोष्ठ्याः विविधेषु सत्रेषु आचार्याः एम्.एल्. एन्.मूर्त्ति-के.इ.देवनाथन्-ओ.एस्.रामलालशर्म-सिएच्.पि. सत्य-नारायणप्रमुखाः आध्यक्ष्यं निर्व्यूढवन्तः तथा च प्रो.सत्यनारायणा-चार्य-आर्-चन्द्रशेखर-जे.बलिचक्रवर्तिप्रमुखाः सभासञ्चालन-मकुर्वन् । त्रिंशदधिकशोधपत्राणि अत्र पठितानि ।

### (7) रसप्रश्नस्पर्धा

**(दिनाङ्कः 09-08-2017, अपराह्णे - 04.00 वादने)**

विद्यापीठस्य आकर्षककार्यक्रमेषु रसप्रश्नस्पर्धा स्वतन्त्रस्थानं निर्वहति । आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयानामाध्यक्ष्ये, डॉ.चक्रवर्तिरङ्गनाथन्महोदयानां सञ्चालकत्वे च कार्यक्रमोऽयं समचाल्यत । विद्यापीठच्छात्राः प्रामुख्येन भागमूढ्वा स्वीयप्रतिभां प्रादर्शयन् ।

अगष्टमासस्य दशमदिनाङ्के प्रातः सार्धाष्टवादने (8:30) प्रायशः विद्यापीठस्य द्विशतसंख्याकाः छात्राः संस्कृतमातुः जयगानं कृत्वा तिरुपति-नगरपरिक्रमणमकुर्वन् । अनेन अपूर्वा काऽपि संस्कृतभाषाविषयकं नागरिकाणां चैतन्यमवलोकितम् ।

सप्ताहव्यापिकार्यक्रमस्य स्वस्तिवाचनिकमहोत्सवः विद्यापीठपरिसरे अन्तर्दौवारिककेन्द्रे 10.08.2017 तमे दिनाङ्के अपराह्णे चतुर्वादने समनुष्ठितः । कार्यक्रमेऽस्मिन् तिरुपति-तिरुमलदेवस्थानपरियोजनायाः विशेषाधिकारिणः **श्रीमन्तः नन्दिवेलुगुमुक्तेश्वररावमहोदयाः** मुख्यातिथित्वेन समागच्छन् । मुख्यातिभिस्सह अस्माकं कुलपतयः अध्यक्षपदवीं निरूह्य विविधस्पर्धासु पुरस्कारभाजां विद्यालयीयच्छात्राणां कृते पुरस्कारप्रदानेन सह संस्कृतविकासकेन्द्रेण सह विविधपरिषदः समुदघाटयन् ।

### नगरकार्यक्रमाः

संस्कृतसप्ताहपरिपालसन्दर्भे कुलपतीनामुद्देश्यपक्षद्वयम् आसीत् — (1) संस्कृतसम्भाषणकौशलवर्द्धनम् तथा च (2) प्राचीनभारतीयसंस्कृतशास्त्राणां संरक्षणम् । अतः शास्त्रसंरक्षणार्थं विविधवादविवादस्पर्धानां परिचालनेन सह तिरुपतिनगरेषु विद्य-मानविद्यालयपरिसरेषु माध्यमिकस्तरे अध्ययनरतानां छात्राणां संस्कृतसम्भाषणकौशलविकासार्थं विविधसंस्कृतसम्भाषण-शिबिराणामायोजनं कृतमासीत् । विद्यापीठस्य संस्कृतसम्भाषण-दक्षाः छात्राः प्रायशः पञ्च विद्यालयेषु ( एस्.वी.ओरियण्टाल-उच्चविद्यालयः, एस्.वी.उच्चविद्यालयः, बालमन्दिरम्, श्री एस्.पी.जे.एल्.म्युनिसिपाल उच्चविद्यालयः, केन्द्रियविद्यालय-1 इत्येतेषु) तथा च द्वयोः महाविद्यालयोः (एस्.वी.आयुर्वेदमहा-विद्यालयः, एस्.वी.ओरियण्टालमहाविद्यालयः इत्यनयोः) प्रायशः त्रिचत्वांरिशत्संख्याकानि सम्भाषणशिबिराणि समायोजयन् । तत्र च 710 संख्याकाः छात्राः नागरिकाश्च 10 दिनाभ्यन्तरे संस्कृत-सम्भाषणे प्रशिक्षिता अभवन् ।







एतदतिरिच्य षष्ठ-सप्तम-अष्टम-नवम-दशमकक्ष्याच्छात्राणां कृते संस्कृतगीतगानस्पर्धा, स्तोत्रगानस्पर्धा, कथाकथनस्पर्धाश्च चालिताः । तत्र 300 भागग्रहीतृछात्रेषु 147 संख्याकाश्छात्राः पुरस्कृता अभवन् ।

अपि च आइ.आइ.टि., तिरुपतिः ; एस्.वी.ओरिय्टालमहा-विद्यालयः, एस्.वी.आयुर्वेदमहाविद्यालयः इत्यासु संस्थासु अस्माकं विद्यापीठस्य प्रसिद्धाः व्याख्यातारः प्रो.राणीसदाशिवमूर्त्तिः तथा बी.चन्द्रशेखरस्वामी च "Management on Bhagavad Geeta", "The Philosophical view of Ayurvedic Treatment" and "An Interpretation of Daivi Vak as depicted in Vedas" इति विषयानाधारीकृत्य विशिष्टानि व्याख्यानानि अकुर्वन् ।

संस्कृतसप्ताहमहोत्सवसमित्यध्यक्षाणाम् आचार्य एम्.एल्.नरसिंहमूर्त्तिमहोदयानाम्, सङ्कायप्रमुखानाम् आचार्य आर.एल्.नरसिंहशास्त्रिमहाशयानाम्, कुलसचिवानाम् आचार्य सी.उमाशङ्करमहोदयानां च समुचितमार्गदर्शनेन समितिसंयोजकानां डॉ.सी.रङ्गनाथनमहोदयानां योजनया, सदस्यानाम् आचार्य जे.रामकृष्ण-आचार्यसत्यनारायणाचार्य-डॉ.सोमनाथदाश-डॉ.के.कादम्बिनी-महाभागानां मिलितोद्यमेन च सप्ताहव्यापिकार्यक्रमः सफलोऽभवत् ।

## अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गः

### 31-05-2017 दिनाङ्कात् 15-06-2017 दिनाङ्कं यावत्



भारतीयपारम्परिकशास्त्राणां संरक्षकत्वेन संवर्धकत्वेन च प्रसिद्धं तिरुपतिस्थं राष्ट्रियसंस्कृतविद्यापीठं विद्यार्थिषु शास्त्रीयपाटवप्रवर्धनाय, शास्त्रं प्रति अभिरुचेरुत्पादनाय च 31-05-2017 दिनाङ्कात् 15-06-2017 दिनाङ्कं यावत् अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गम् अनतिसाधारणं सर्वविधानुकूल्यकल्पनपुरस्सरं प्राचालयत् । राष्ट्रियसंस्कृतसंस्थानस्य वित्तसाहाय्येन निरूढेऽस्मिन् वर्गे देशस्य नानादिग्भ्यः समागतेभ्यः षट्सप्ततेश्छात्रेभ्यः पञ्च-पञ्चाशत्संख्याकाः छात्राः परीक्ष्य चिताः छात्रवृत्तिलाभपुरस्सरं भागमग्रहीषुः । इतरे एकविंशतिसंख्याकाश्छात्रा अपि विशेषप्रार्थनया अत्र भागमभजन्त ।

वर्गेऽस्मिन् छात्राः छात्र्यश्च गुरुकुलीयपरिवेशे निर्दिष्टदिनचर्यां पालयन्त्योऽवर्तन्त । विद्यापीठस्य मान्यानां शास्त्ररक्षणनिष्ठानां कुलपतीनां प्रो.वी.मुरलीधरशर्ममहाभागानां सत्सङ्कल्पेन पुनः प्रादुर्भूतोऽयं शास्त्रार्थप्रशिक्षणवर्गः तेषां मार्गनिर्देशने, विद्यापीठीयानामाचार्याणां प्रो.एम्.एल्.एन्.मूर्त्तिमहाभागानामाध्यक्ष्ये, प्रो.जे. रामकृष्णमहाभागानामाध्यक्ष्ये ; तथा च प्रो.ओ.एस्.रामलालशर्म-प्रो.जी.एस्.आर्.कृष्णमूर्त्ति-प्रो.के.गणपतिभट्ट-डॉ.के.विश्वनाथ- महाभागानां समायोजकत्वे ; एवमेव डॉ.नारायण-डॉ.ओ.जी. पी.कल्याणशास्त्रि-डॉ.यशस्विप्रमुखाणां सहसमायोजकत्वे फलेग्रहिस्समपद्यत । व्याकरणे, न्याये, द्वैतवेदान्ते, अद्वैतवेदान्ते, साहित्ये च निर्धारितान् विशिष्टानंशान् अध्यापयितुं देशस्य नानास्थानेभ्यः तत्तच्छास्त्रनिष्णाता उपपञ्चाशाः विद्वांशः सनिमन्त्रणं समागताः । यथा –

**न्याये** —प्रो.एस्.सुब्रह्मण्यम् (हैदराबादः). श्री जे.श्रीनिवासशर्मा (चेन्नै), प्रो.ओ.एस्.रामलालशर्मा (तिरुपतिः), डॉ.इ.एम्.देवन् (केरला), डॉ.आर्.बालमुर्गन् (देवप्रयागः), श्रीजे.सूर्यनारायणः (चेन्नै), डॉ.रङ्गनाथगणाचारी, श्रीकुप्पनरसिंहः (तिरुपतिः), डॉ.सन्दीपशर्मा (उज्जैन), प्रो.श्रीनिवासवर्खेडी (वाङ्गालोर्), डॉ.ओ.जी.पी.कल्याणशास्त्री (तिरुपतिः), डॉ.बि.भि.वेङ्कटरमणा च ।

**अद्वैतवेदान्ते** — प्रो.मणिद्राविडः (चेन्नै), डॉ.महेश्वरन् नम्बुदरी (चेन्नै), प्रो.राजारामशुक्ला (वाराणसी), विद्वान् श्रीहरिधाइगुडे (चेन्नै), प्रो.सिएच्.सत्यनारायणशास्त्री (कालाडी), डॉ.सतीशः (नवदेहली), प्रो.आर्.कृष्णमूर्त्तिशास्त्री (चेन्नै), डॉ.गणेश ईश्वरभट्टः (श्रीङ्गेरी), प्रो.एम्.एल्.एन्.मूर्त्तिः (तिरुपतिः), डॉ.के.विश्वनाथशर्मा (तिरुपतिः) च ।

**द्वैतवेदान्ते** — प्रो.डी.प्रह्लादाचारः (वेङ्गलूरु), श्री एल्. सुधीन्द्राचारः, प्रो.ए.हरिदासभट्टः (वेङ्गलूरु), श्रीप्रह्लादाचार्यः, प्रो.एच्.सत्यनारायणः (वेङ्गलूरु), श्रीमधुसूदनाचार्यपाण्डुरङ्गी, डॉ.वि.एन्.के.पाण्डुरङ्गी (वेङ्गलूरु), डॉ.तिरुमलाकुल्कर्णी (वेङ्गलूरु), श्रीरघूत्तमाचार्यनागसाम्पिगे, डॉ.एच्.पी.नागराजाचारः, प्रो.नरसिंहाचार्यपुरोहितः (तिरुपतिः), श्रीधनञ्जयाचार्यश्च ।

**व्याकरणे** — प्रो.एस्.एस्.मूर्त्तिः (तिरुपतिः), श्रीके.एस्. जि.विल्वेशशर्मा (चेन्नै), डॉ.सिएच्.नरसिंहमूर्त्तिः (श्रीङ्गेरी), श्रीमणिकण्ठघनपाठी (श्रीरङ्गम्), प्रो.के.सी.पाढी (पुरी), डॉ.चन्द्रशेखरभट्टः (श्रीङ्गेरी), डॉ.सि.एच्.ए.पद्मनाभम् (श्रीङ्गेरी), डॉ.प्रमोदभट्टः (श्रीङ्गेरी),







प्रो.जे.रामकृष्णः (तिरुपतिः), डॉ.जि.एस्.वी.दत्तात्रेयमूर्त्तिः (काञ्ची), प्रो.वी.गोपालकृष्णशात्री, प्रो.महेश्वरभट्टः, प्रो.सिएच्.पूर्णानन्दशास्त्री च ।

**साहित्ये** — प्रो.एस्.सुदर्शनशर्मा (तिरुपतिः), डॉ.एन्.सुदर्शनः (कालिकट्), प्रो.एस्.एल्.कुमारशर्मा (गुण्टुर्), डॉ.राघवेन्द्रभट्टः (श्रीङ्गेरी), प्रो.रामसूर्यनारायणः (तिरुपतिः), श्री अमृतेशाचार्यः (उडुपी), प्रो.एस्.एल्.पि.आञ्जनेय शर्मा (पण्डिचेरी), प्रो.रामकुमारशर्मा (जयपुरम्) च ।

अन्येषु शास्त्रेषु च मार्गदर्शकाः आसन् — प्रो.के.ई.देवनाथन् (विशिष्टाचार्ये मीमांसायां च), प्रो.सि.एच्.श्रीरामशर्मा (मीमांसायाम्), डॉ.के.विश्वनाथशर्मा (मीमांसायाम्) च ।

छात्राणां प्रतिभापाटवप्रकाशनाय सांस्कृतिककार्यक्रमा अपि समायोज्यन्त ।

अध्यापनार्थं न्याये ''**सामान्यनिरुक्तिः द्वितीयलक्षणम्**'', अद्वैतवेदान्ते ''**अद्वैतसिद्धिः – मिथ्यात्वामिथ्यात्वम्**'', द्वैतवेदान्ते ''**न्यायामृतम् (प्रथमतः पञ्च प्रकरणानि)**'', व्याकरणे ''**लघुमञ्जूषा - सुबर्थवादः**'', साहित्ये ''**ध्वन्यालोकः - द्वितीयोद्द्योतः**'' इत्येते तत्तच्छास्त्रनिष्ठप्रमुखग्रन्थोक्तविषयाः निर्धारिता आसन् ।

अमुष्य वर्गस्य उद्घाटनकार्यक्रमः एकत्रिंशे दिनाङ्के मन्त्रालय-राघवेन्द्रस्वामिमठस्य मठाधीशानां श्रीश्रीसुबुधेन्द्रतीर्थस्वामिनां वागाशीर्वादेन द्विलक्षात्मकवित्ताशीर्दानेन, विद्यापिठस्य कुलपति-वर्याणां प्रो.वी.मुरलीधरशर्ममहाभागानामाध्यक्ष्ये, विद्यापीठस्य कुलपतिचराणां प्रो.डी.प्रह्लादाचारमहाभागानां मुख्यातिथित्वे, गौतमीविद्यापीठस्य प्रांशुपालचराणां प्रो.वी.गोपालकृष्णशास्त्रि-वर्याणां विशिष्टातिथित्वे, विद्यापीठस्य शैक्षिकसङ्कायप्रमुखाणां प्रो.आर्.एल्.नरसिंहशास्त्रिमहाभागानाञ्चोपस्थितौ समपद्यत ।

प्रशिक्षणावसरे छात्राणां प्रतिदिनं दिनचर्याऽपि अधोलिखितप्रकारेण निर्धारिताऽऽसीत् । यथा -

| | |
|---|---|
| प्रातरुत्थानम् | 5:00 am |
| योगाभ्यासः | 5:30 – 6:15 am |
| स्नानं तथा दैनिककार्यम् | 6:15 – 7:15 am |
| प्रातराशः | 7:30 – 8:15 am |
| प्रार्थना | 8:15 – 8:30 am |
| प्रथमकक्ष्या | 8:30 – 9:45 am |
| पुनरीक्षणम् | 9:45 – 11:00 am |
| चाहापानम् | 11:00 - 11:15 am |
| आदर्शवाक्यार्थः | 11:15 – 12:30 pm |
| मध्याह्नभोजनम् | 12:30 – 2 :30 pm |
| द्वितीयकक्ष्या | 2:30 – 3:45 pm |
| चाहापानम् | 3:45 – 4:00 pm |
| द्वितीयकक्षोक्तपाठस्य पुनरीक्षणम् | 4:00 – 5:30 pm |
| विरतिः | 5:30 – 6:00 pm |
| सांस्कृतिककार्यक्रमाः/ | |
| वाक्यार्थाभ्यासश्च | 6:00 – 8:00 pm |
| रात्रिभोजनम् | 8:00 – 9:00 pm |
| लेखनकौशलविकासः | 9:00 – 10:00 pm |
| शयनम् | 10:00 pm |



''**प्रातिभम्**'' इति नाम्ना सञ्चालितेषु सांस्कृतिककार्यक्रमेषु एकपात्राभिनयः, श्लोकान्त्याक्षरी, गजल्-गीतगानम् इत्यादयः चित्ताकर्षका आसन् ।

**सांस्कृतिककार्यक्रमाः**

०८.०६.२०१७ तमे दिनाङ्के पद्मावतीमहिलाविश्वविद्यालयस्य, सङ्गीतविभागस्य सहाचार्या डॉ.आर्.एन्.एस्.शैलेश्वरीमहोदया समुपस्थाय स्वीयस्वरझङ्कारं प्रास्तौत् । एवं समापनदिवसात्प्राक् सर्वेषां छात्राणां कृते रसप्रश्नस्पर्धा समायोजिता ।

जूनमासस्य पञ्चदशे दिनाङ्के त्रिवादने श्रीजगद्गुरुरामानन्दाचार्यविश्वविद्यालयस्य कुलपतिचराणां प्रो.के.वि.रामकृष्णमाचार्युलुमहाभागानां मुख्यातिथित्वे, श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयस्य कुलपतीनां प्रो.के.ई.देवनाथान्महाभागानां विशिष्टातिथित्वे, राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतीनां प्रो.वी.मुरलीधर- शर्ममहाभागानामाध्यक्षे च प्रशिक्षणवर्गस्यास्य समापनसमारोहः साफल्यमभजत ।










# संस्कृते विज्ञानवैभवम्



## ।। उदकार्गलम् ।।

### (Expolration of Water Spring)

सुप्रसिद्धज्योतिर्विदो वराहमिहिरस्य बृहत्संहिताख्ये ग्रन्थे ''उदकार्गलम्'' इति अध्यायो वर्तते । तत्र समुदायतया 125 श्लोका: विद्यन्ते, येषु भूगर्भस्थजलस्य विविधस्थितीनां वैज्ञानिकविवरणं प्राप्यते । तत: केचन श्लोका अत्र उद्ध्रियन्ते ।

**जम्ब्वाश्चोदग्धस्तैस्त्रिभि: शिराधो नरद्वये पूर्वा ।**
**मृल्लोहगन्धिका पाण्डुरा च पुरुषेऽत्र मण्डूक: ।। ८ ।।**
**जम्बूवृक्षस्य प्राग्वल्मीको यदि भवेत्समीपस्थ: ।**
**स्याद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ।। ९ ।।**
**अर्धपुरुषे च मत्स्य: परावतसन्निभश्च पाषाण: ।**
**मृद्भवति चात्र नीला दीर्घं कालं च बहु तोयम् ।। १० ।।**
**पश्चादुदुम्बरस्य त्रिभिरेव करैर्नरद्वये सार्धे ।**
**पुरुषे सितोऽहिरश्माञ्जनोपमोऽध: शिरा सुजला ।। ११ ।।**

**(बृहत्संहिता - 54/8-11)**

**हिन्दी** — जलहीन देश में जामुन के पेड से तीन हाथ उत्तर में दो पुरुष नीचे पूर्व दिशा की शिरा (आव) होती है। खोदने पर वहाँ से लोहे के गंध की मिट्टी निकलती है । फिर पांडुरंग की मिट्टी होती है। एक पुरुष नीचे मेंढक निकलता है । (8) यदि जामुन के पेड से पूर्व दिशा में पास ही सर्प की बाँबी हो तो उस पेड से तीन हाथ दक्षिण में दो पुरुष नीचे मधुर जल होता है। (9) वहाँ आधा पुरुष खोदने पर मत्स्य निकलता है और कबूतर के रंग का पत्थर होता है । यहाँ की मिट्टी नीली होती है, जल होता है। जो बिल्कुल काला होता है। यह भी तीन हाथ दूर हो । (10) निर्जल क्षेत्र में गूलर के वृक्ष से तीन हाथ पश्चिम में ढाई पुरुष नीचे शिरा होती है। एक पुरुष नीचे सफेद सर्प निकलता है, फिर काजल सा बिलकुल काला पत्थर होता है। उसके नीचे मनोहर जल की धारा होती है। (11)

**English -** In a waterless land, If a Jambu tree is found, an easterly vein will be obtained at a depth of ten cubits at a distance of three cubits to its north. The signs are, the earth smelling like iron at a depth of five cubits ; nex pale-white clay and further a frog. (8) If there is an ant hill nearby to the east of a Jambu tree, there will be sweet water at a depth of ten cubits at a distance of three cubits to the south of the tree. (9) When the earth is dug 2½ cubits deep, there will be found fish; next a stone with the colour of a dove ; and next blue clay. Here there will be plenty of water for a long time. (10) If there is an Indian fig tree in a waterless tract, there will be a vein of good water at distance of only three cubits to its west and and at a depth of 12 ½ cubits. Here the signs are a white snake at a depth of five cubits and further a stone as dark as collyrium.

**सकुशासित ऐशान्यां वल्मीको यत्र कोविदारस्य ।**
**मध्ये तयोर्नरैरर्धपञ्चमैस्तोयमक्षोभ्यम् ।।**
**प्रथमो पुरुषे भुजग: कमलोदरसन्निभो मही रक्ता ।**
**कुरुविन्द: पाषाणश्चिह्नान्येतानि वाच्यानि ।।**

**(बृहत्संहिता - 54/27-28)**

**हिन्दी** - कोविदार (सप्तपर्ण वृक्ष के ईशान (उत्तर-पूर्व) में कुश सहित सफेद मिट्टी की बाँबी हो तो वृक्ष और बाँबी के बीच साढे पाँच पुरुष नीचे बहुत पानी होता है । (27) प्रथम पुरुष खोदने पर कमल के फुल के मध्यभाग जैसे रंग का सर्प निकलता है । फिर लाल रंग की मिट्टी, फिर कुरविन्द (लालमणि) नामक पत्थर आता है । (28)

**English -** If there is an anthill covered by the holy grass to the north east of a mountain Ebony tree, there will be inexhaustible water at a depth of twenty two and a half cubits between the tree and the anthill. The appearance of a snake of the colour of the lotus calyx at a depth of five cubits from the surface level, followed by layers of red earth and coryndon stone indicate the presence of water.

**भार्ङ्गी विवृता दन्ती शूकरपादीश्च लक्ष्मणा चैव ।**
**नवमालिका च हस्तद्वयेऽम्बु याम्ये त्रिभि: पुरुषै: ।।**
**स्निग्धा: प्रलम्बशाखा वामविकटद्रुमास्समीपजला: ।**
**सुषिरा जर्जरपन्ना: रूक्षाश्च जलेन सन्त्यक्ता: ।।**

**(बृहत्संहिता - 54/48-49)**

**हिन्दी –** भांरगी, निसोत दंती (दत्यूणी), सूकरपादी, लक्ष्मण, मालती वनस्पति जहाँ हो तो उनसे दो हाथ दक्षिण में तीन पुरुष नीचे पानी होता है। (48) जहाँ चिकनी लम्बी शाखा वाले छोटे-छोटे फैले हुए वृक्ष हों तो जल पास में ही होता है। परन्तु छेदवाले जर्ज पत्तों के रूखे पेड हों वहाँ पानी नहीं होता। (49)

**English -** If, a kind of Brinjal, Trivrta, Nāgadantī, Śūkarapādi, Lakṣmaṇā and Navamallikā creeper be found to be growing, then water will be found at 15 cubits below the earth and two cubits to the South. (48) The trees which are short and widespread, with long hanging branches and glossy leaves indicate the presence of underground water nearby. Whereas trees which are hollow and dry with pale leaves indicate non-existence of underground water nearby. (49)





# पादपपर्व (१६.०७.२०१७)




''वृक्षो रक्षति रक्षित:'' इति वेदेषु प्रसिद्धा सूक्ति: । अर्थात् यदि परिवेशस्य सुरक्षा अस्माभि: क्रियेत, तर्हि परिवेशोऽस्माकं सुरक्षां विदधाति । अनेन मन्त्रेण दीक्षिता: भारतीया: सर्वत्र पादपरोपणमहोत्सवं परिपालयन्ति । अस्माकं विद्यापीठप्राङ्गणे 16.07.2017 तमे दिनाङ्के प्रात: नववादने उत्सवोऽयं विद्यापीठस्य राष्ट्रियसेवायोजनासंस्थया (NSS)आयोजित:। सर्वेऽप्यध्यापका:, कर्मचारिण:, छात्रा:, NSS सेवका: मिलित्वा 1200 संख्याका: पादपपर्व (वृक्षारोपण) कार्यक्रमे सोत्साहं भागमूद्वा तं सफलमकुर्वन् ।

कार्यक्रमस्यास्य समुद्घाटनं विद्यापीठस्य कुलपतय: आचार्य वि.मुरलीधरशर्ममहोदया: अकुर्वन् । तत्र समुपस्थितान् समुद्बोधयन्त: ते प्रावदन् यत् – विश्वे सर्वेऽपि जीवा: मुखेन जलं पिबन्ति, किन्तु पादपा:(वृक्षा:) पादेन पिबन्तीति सार्थकनामानो भूत्वा मानवानां जीवनाधारभूतास्सन्ति । तथापि एतादृशानां वृक्षाणां छेदनं सर्वत्र दरीदृश्यते । अनेन मानवजाते: महान् अनर्थो जायते । अत: सर्वै: सर्वत्र वृक्षाणां रोपणं करणीयमिति स्वीयाभिप्रायं प्रकटीकृत्य अस्माकं प्राचीनमहर्षीणां वचांसि ''तरुदेवो भव'', ''वृक्षो रक्षति रक्षित:'' इति समस्मारयन् ।



मन्दारैस्तगरैश्च चम्पकफलीशेफालिभिस्सज्जितं
नानाह्वस्वलसल्लतासुललितं लीलास्थनं सुन्दरम् ।
श्रेणीनां मधुगुञ्जनेन मधुरं पुण्यं पवित्रान्वितं
केन्द्रीयं सुरभारतीस्थलमिदं संराजते सर्वदा ।।
गुल्मैर्बीजपुरैश्च दाडिमफलैर्जम्बीरजम्ब्वादिभि-
र्नारङ्गैर्बहुबीजबिल्वकदलीवृक्षादिभिश्शोभितम् ।
नित्यं कोकिलगुञ्जनेन सुखदं वासन्तिकैस्सौरभै-
र्विद्यापीठमिदञ्च नन्दनवनं मोमुद्यते सर्वदा ।।

विद्यापीठस्य व्याकरणविभागस्य वरिष्ठा: आचार्या श्री जानमद्दि रामकृष्णमहोदया: अवसरेऽस्मिन् उक्तवन्तो यत् – अस्य कार्यक्रमस्य ''पादपपर्व'' इति सार्थकं नाम भवति । 25 वर्षेभ्य: पूर्वं तिरुपतितिरुमलदेवस्थानस्य अटवीशाखाया: (Forest Department)साहाय्येन विद्यापीठस्य प्राक्तनकुलपतिभि:



प्रो.रघुनाथाचार्यमहोदयै: विद्यापीठमिदं हरितमयं कर्तुं ''**हरितविप्लव:**'' व्यधायि इति विषयस्तै: स्मारित: ।

अवसरेऽस्मिन् चित्तूरजिल्लाया: पालनाधिकारिण: (Collector) श्रीप्रद्युम्नमहोदया: 520 लघुवृक्षान् रोपणार्थं समार्पयन् । विद्यापीठस्य उद्यानसंरक्षकाधिकारी श्रीविजयराघवरेड्डीमहोदय: एकलक्षरूप्यकपरिमितायुर्वेदसम्बन्धि-पूजोपयोगि-छायादायिनि-वृक्षान् प्राददत् ।

कार्यक्रमेऽस्मिन् विद्यापीठस्य साहित्यसंस्कृतिसङ्घायप्रमुखा: आचार्य सिएच्.पि.सत्यनारायणमहोदया: ; राष्ट्रियसेवायोजनाया: संयोजका: श्रीदक्षिणामूर्त्तिमहोदया: तथा अन्ये सहसंयोजका:; राष्ट्रियपाण्डुलिपिमिशन्संस्थाया: निदेशका: आचार्या: वेङ्कटरमणा रेड्डीमहोदया: ; सहस्रावधानिश्रीमेडसानिमोहनमहोदया: अपि उपस्थिता आसन् ।



## उत्कलपीठेन समायोजिता द्विदिवसीयराष्ट्रियसङ्गोष्ठी

## ''श्रीचैतन्यदर्शनसिद्धान्तविमर्शः''

**दिनाङ्कः - २५.१०.२०१७ तः २६.१०.२०१७**



तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्योत्कलपीठेन ''श्रीचैतन्यदर्शनसिद्धान्तविमर्शः'' इति विषयमवलम्ब्य २५.१०.२०१७ तः २६.१०.२०१७ दिनाङ्कं यावद् दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी समायोजिता । सङ्गोष्ठ्या अस्याः समुद्घाटनसमारोहे विद्यापीठस्य कुलपतयः प्रो.वि.मुरलीधरमशर्महोदयाः आध्यक्ष्यपदवीं निरुह्य स्वीयभाषणे श्रीचैतन्यमहाप्रभोः दर्शनमाधारीकृत्य तात्त्विकं समालोचनमकुर्वन् । चैतन्यसम्बद्धानामुपादेयाप्रकाशितग्रन्थानां प्रकाशनेन समाजस्य महान् उपकारो भविष्यतीति उक्त्वा पुस्तकानां नामानि ते उदघोषयन् । तिरुपतिस्थआन्तर्जातीयश्रीकृष्णचेतनासंस्थायाः (ISCON) अधिकारणाः **प्रभुपादरेवतीरमणदासमहाशयाः** मुख्यातिथिरूपेण समागत्य वैश्विकस्तरे कृष्णचेतनायाः प्रचारे चैत्यन्य एव कारणभूत इति समुद्घोषितवन्तः । सम्पूर्णे विश्वे इदानीं जनाः राधाकृष्णयोः संकीर्तनं कुर्वन्ति । इतोऽपि एतादृशः समधिकः प्रयत्नः अपेक्ष्यते येन जनाः उद्बुद्धाः भवेयुरिति तैः स्वीयाभिभाषणे प्रकटीकृतम् । उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यचराः **प्रो. गोपालकृष्णदाश**महाभागाः मुख्यभाषणावसरे उत्कलवङ्गप्रदेशयोः सीमनिर्धारणे ऐतिहासिकानां मतं पुरस्कृत्य तत्र उभयोः प्रदेशयोः भौगोलिकस्थितिं प्रत्यपादयन् । श्रीचैतनस्य उत्कलागमने हेतवः के इत्यस्मिन् विषये तैः भृशमालोचितम् ।

विद्यापीठस्य शैक्षिकसङ्कप्रमुखैः **प्रो.आर्.एल्.एन्.शास्त्रि**-महाभागैः सम्मानितातिथिरूपेण समागत्य चैतन्यदृष्ट्या राधाकृष्णयोः तात्त्विकं चिन्तनं प्रकटीकृतम् । तथैव साहित्यविभागस्याचार्याः उत्कलपीठस्य मार्गदर्शकाः प्रो.जि.एस्.आर्.कृष्णमूर्त्तिमहाभागाः स्वागतभाषणं प्रदत्तवन्तः ।

सङ्गोष्ठ्यामस्यां वङ्गप्रदेश-ओडिशा-कर्णाटक-तेलेङ्गाण-कोशलमहाराष्ट्र-आन्ध्रप्रदेशादिविभिन्नेभ्यः प्रदेशेभ्यः वरिष्ठा आचार्याः समागत्य चैत्यनदर्शनविषये स्वीयं बहुमूल्यं पत्रं समुपास्थापयन् । दिनद्वयात्मिकायां सङ्गोष्ठ्यामस्यां षट्सत्राणि समायोजितानि । तेषु पञ्च सत्राणि आचार्याणां कृते, एकं सत्रं च शोधच्छात्राणां कृते आसीत् । विद्यापीठस्यास्य नैका प्राचार्याः, अध्यापकाः पत्राणि समार्पयन् ।

स्वस्तिवाचनिकमहोत्सवः २६.१०.२०१७ दिनाङ्के सायं पञ्च वादने विद्यापीठस्य रमारञ्जनमुखर्जिसभाङ्गणे कुलपतीनामाध्यक्ष्ये समनुष्ठितः । अत्र मुख्यातिथिरूपेण भाग्यनगरस्य जीयर्-वैदिकप्रकाशन-संस्थायाः अध्यक्षाः **आचार्याः एस्.वि.आर्.रङ्गरामानुजाचार्युलु**-महाभागाः समागताः । तैः स्वीयभाषणे भक्तिरसविषये बह्वालोचितम् । उत्कलपीठस्य मार्गदर्शकाः डॉ.राधागोविन्दत्रिपाठिमहोदयाः अतिथीनां स्वागतमकुर्वन् । वरिष्ठाः मार्गदर्शकाः प्रो.जि.एस्.आर्.कृष्णमूर्त्तिमहाभागाः धन्यवादं समार्पयन् । उत्कलपीठस्य संयोजकाः डॉ.निरञ्जनमिश्रमहोदयाः सम्पूर्णकार्यक्रमं समचालयन् ।

साररूपेण सङ्गोष्ठ्यां समालोचितेषु विषयेषु — 'श्रीचैतन्योपरि राधाकृष्णयोः प्रभावः', 'चैतन्यशिक्षाष्टकम्'. 'चैतन्यदर्शने मोक्षस्वरूपम्', 'चैतन्यदर्शने राधातत्त्वविचारः', 'चैतन्यदर्शने योगविचारः', 'नवधा भक्तिः चैतन्यभक्तिश्च', 'रामानुजसम्प्रदायस्य भक्तिस्वरूपम्', 'मुक्तिमार्गे भक्तेः स्वरूपम्', 'दक्षिणप्रदेशे चैतन्यसिद्धान्तप्रचारः', 'चैतन्यस्य बाल्यावस्था', 'गौडीयवैष्णवदर्शनं तद्वैशिष्ट्यञ्च', 'चैतन्यसमकालीनसमाजः', 'चैतन्यजीवनदर्शनम्', 'श्रीचैतन्यभक्तिसाहित्ये रूपगोस्वामिनः योगदानम्', 'चैतन्यस्य यात्राविशेषाः सम्प्रदायस्य मठाः', 'केरलप्रदेशे चैतन्यसिद्धान्तप्रचारः','अचिन्त्यभेदाभेदवादः', 'चैतन्यदर्शनम्', 'माध्वसम्प्रदायः गौडीयसम्प्रदायश्च', 'माध्वचैतन्यदर्शनयोः तौल्यविचारः', 'कीर्तनभक्तेः श्रुतिमूलकत्वम्', 'श्रीचैतन्यदर्शने श्रीजगन्नाथतत्त्वम्', 'उज्ज्वलनीलमणिः', 'श्रीचैतन्यः उत्कलीयाः पञ्च सखायश्च', 'श्रीचैतन्यचरित्रम्', 'द्वैतवादिनां भक्तिस्वरूपम्', 'चैतन्यसाहित्यम्', 'चैतन्यसाहित्ये भक्तिरसः' इत्यादयः प्रधाना आसन् ।

वैष्णवभक्तेषु भक्त्यान्दोलनस्य प्रमुखः आन्दोलनकारी श्रीचैतन्यः पूर्वभारते (वांग्लादेश-पश्चिमवङ्ग-विहार-झारखण्ड-मणिपुर-आसाम-ओडिशाराज्येषु) क्रान्तिकारिपरिवर्तनमानीतवान् । गौडीयवैष्णवसम्प्रदायस्यायमाद्यः प्रवर्तकः । अस्यानुयायिनः एनं विष्णोरवतारत्वेन **"राधाराणी"**रूपेण प्रतिपादयन्ति । अस्याराध्यदेवः श्रीकृष्णः । गुरुणा प्रदत्तः कृष्णमहामन्त्रः अस्य कृते जीवनस्य मानदण्ड









आसीत् । तस्य शरीरं गौरवर्णत्वात् नाम्नायं **"गौराङ्गमहाप्रभुः"** इति उच्यते । निम्बवृक्षस्याधोऽस्य जन्म अभूदिति हेतोः **"निमाई"** इति अपरं नामापि भवति । अस्य जीवनवृत्तप्रतिपादकस्त्रयो ग्रन्थास्समुपलभ्यन्ते । यथा – (1) कृष्णदासकविराज-गोस्वामिरचितं **"चैतन्यचरितामृतम्"** (2) वङ्गभाषायां वृन्दावनदासविरचितं **"चैतन्यभागवतम्"** (3) लोचनदासविरचितं **"चैतन्यमङ्गलम्"** च । चैतन्यचरितामृताधारेणास्य जन्म **18th February, 1486** संवत्सरेऽभूत् । अस्य जन्मनाम **"विश्वम्भरः"** । अयं जगन्नाथस्य द्वितीयपुत्र आसीत् । मातुर्नाम शचीदेवी । पश्चिमवङ्गराज्यस्थ-नदिआजिल्लायाः नवद्वीपः अस्य जन्मस्थानम् । गुरुः **"ईश्वरपुरी"** अस्मै हरेकृष्णमहामन्त्रदीक्षां दत्तवान् । अयं केशवभारतीतः संन्यासं स्वीकृतवान् । अस्य प्रथमपत्नी लक्ष्मीदेवी सर्पदंशनेन मृतवतीति हेतोः अयं विष्णुप्रियया सह द्वितीयविवाहं चकार । तस्य जीवनस्य अन्तिमानि 24 वर्षाणि सः उत्कलराज्यस्य जगन्नाथधाम्नि पुरीनगरे व्यतीतानि आसन् । तस्मिन् समये उत्कलस्य राजा गजपतिमहाराजः प्रतापरुद्रदेव आसीत् । 1534 संवत्सरे चैतन्यमहाप्रभुः दिवंगतः । वैष्णवसम्प्रदायस्य महनीयमहानायकः श्रीचैतन्यः **"अद्वैताचार्यः"**, **"नित्यानन्दमहाप्रभुः"** इति नाम्नाऽपि परिचितो भवति ।

अस्य शिष्येषु वृन्दावनस्य षड्गोस्वामिनः प्रसिद्धास्सन्ति । यथा - (1) रूपगोस्वामी (2) सनातनगोस्वामी (3) गोपालभट्टगोस्वामी (4) रघुनाथभट्टगोस्वामी (5) रघुनाथदासगोस्वामी (6) जीवगोस्वामी च । एते क्रमबद्धतयाऽस्य सम्प्रदायस्य प्रचारे प्रसारे च मुख्यां भूमिकां निर्व्यूढवन्तः । एतदनन्तरमनेके नैष्ठिकाश्शिष्या भवन्ति । तेषु नरोत्तमदासठाकुरः, श्रीनिवासाचार्यः, श्यामानन्दपण्डितः, रामचरणकविराजः, गङ्गनारायणचक्रवर्ती प्रमुखास्सन्ति ।

**अचिन्त्यभेदाभेदवादग्रन्थाः** — यद्यपि श्रीचैतन्यः अचिन्त्यभेदाभेदवादस्य प्रमुखः प्रचारकः संस्थापकश्चासीत् तथापि तेन तत्त्वमिदमाधारीकृत्य कोऽपि ग्रन्थः न रचितः । मध्वाचार्यभाष्यमेव स्वीय सम्प्रदायभाष्यत्वेन सः स्वीचकार । मध्वाचार्यभाष्ये आपाततो यो योंऽशः श्रीमद्भागवतस्य विरोधीति प्रतीयते, तस्य तस्यांशस्य प्रकृतार्थमाविष्कृत्य तस्य तेन सह सामञ्जस्यं संस्थाप्य चैतन्येन अचिन्त्यभेदाभेदवादस्य प्रवचनं कृतम् । चैतन्येन "शिक्षाष्टकम्" प्रणीतं, यत्र अष्टौ श्लोकाः विराजन्ते । काव्यमिदं भक्तिधर्मस्य सारस्वरूपं, सुखोपलब्धेः चरमं साधनं, वैष्णवभजनतत्त्वाधारितञ्च भवति । अस्याष्टकस्य रचनासमयोऽद्यावधि सन्देहास्पदं दुर्ज्ञेयश्चास्ति । कविराजगोस्वामिमतानुसारं श्रीमन्महाप्रभुश्चैतन्यः अष्टकगतश्लोकानां पाठं व्याख्यानं, रसास्वादनञ्च गम्भीरामन्दिरे रात्रौ स्वभक्तयोः गोस्वामि-रामानन्दरायमहोदययोः सम्मुखे उपस्थापयामास । अतः श्लोकानां प्रचारः एताभ्यामेव भक्ताभ्यां कृत इति ज्ञायते । अष्टकेऽस्मिन् अष्टौ श्लोकाः विद्यन्ते । येषु कृष्णनाम्नः महत्त्वम्, कृष्णनामोच्चारणस्याधिकारिणः, स्वकीयभावप्रवणता, सर्वत्यागभावना, श्रीकृष्णनामोच्चारणावसरे जीवस्य शारीरिकमानसिक-बौद्धिकदशा, श्रीकृष्णस्वरूपदर्शनार्थं चैतन्यमहाप्रभोः व्याकुलितं मनः इत्यादयः विषयाः सुष्ठु प्रतिपादिताः । चैतन्यस्य मतवादः मध्वमतप्रभावित इति ऐतिहासिकाः कथयन्ति । निम्बार्कमतमपि चैतन्यमतेऽवलोक्यते । वस्तुतः चैतन्यस्य अनुयायिनः जीवगोस्वामि-बलदेवविद्याभूषण-वृन्दावनदास-कृष्णदासकविराज-सार्वभौमभट्टाचार्य-कविकर्णपूर-परमानन्दपुरी-गौरीदास-परमानन्दगुप्त-गोपालबसुप्रमुखाः नैकानि ग्रन्थरत्नानि रचयामासुः । एतेषु ग्रन्थेषु प्रायश्चैतन्यजीवनवृत्तं तथा चैतन्यदर्शनम् "अचिन्त्यभेदाभेद"इति दरीदृश्यते । यथा - वृन्दावन-दासस्य **"चैतन्यभागवतम्"**, कृष्णदास- कविराजस्य **"चैतन्यचरितामृतम्"**, जगदानन्दलोचनदासाभ्यां प्रणीतं **"चैतन्यमङ्गलम्"**, कविकर्णपूररचितं **"चैतन्य- चन्द्रोदयनाटकम्"**, सार्वभौमभट्टाचार्यप्रणीतं **"चैतन्यसहस्रनाम"**, परमानन्दपुरीरचितं **"गोविन्दविजयम्"**, गौरीदासपण्डितरचितानि **चैतन्यगीतानि**, परमानन्दगुप्तरचितं **"गौडराजविजयम्"**, जीवगोस्वामिनः **"षट्सन्दर्भः"**, बलदेवविद्याभूषणस्य ब्रह्म- सूत्रटीका "गोविन्दभाष्यम्", "सिद्धान्तरत्नम्" इत्यादयः ग्रन्थाः प्रसिद्धास्सन्ति । एतेषु ब्रह्मसूत्राणामुपरि गौडीयवैष्णवाचार्येण बलदेवविद्याभूषणेन रचितं **"गोविन्दभाष्यम्"** अचिन्त्य- भेदाभेदसिद्धान्तस्यापूर्वः ग्रन्थोऽस्ति । गोविन्दस्य स्वप्नादेशेन भाष्यमिदं रचितमिति हेतोरस्य नाम गोविन्दभाष्यमिति अभूत् । अस्य ग्रन्थस्योपरि **"सूक्ष्मा"** इति टीका समुपलभ्यते । अस्याः टीकाकारः स्वयमेव बलदेवो भवति इति केचन प्रवदन्ति । गोविन्दभाष्यस्य संक्षिप्तीकरणं बलदेवेन **"सिद्धान्तरत्नम्"** इति ग्रन्थे कृतम् । सिद्धान्तरत्नस्यापि एका टीका लभ्यते । अस्याष्टीकायास्तथा गोविन्दभाष्यस्य सूक्ष्मेति टीकायाः कर्ता एक एव इति ज्ञायते । उभयत्र एकः श्लोकस्समुपलभ्यते य इदं प्रमाणीकरोति । तद्धि –

**आलस्यादप्रवृत्तिः स्यात्पुंसां यद्ग्रन्थविस्तरे ।**
**गोविन्दभाष्ये संक्षिप्ते टिप्पणी क्रियतेऽत्र तत् ।।**

(सूक्ष्मटीका - पृ.5)



## आधुनिकप्राविधिकप्रणाल्या छात्राणां प्रवेशप्रक्रिया

दिनाङ्कः - १९.०६.२०१७



महानयं गौरवस्य विषयो यत् 2017-18 शैक्षिकसत्रे राष्ट्रियसंस्कृत-विद्यापीठस्य (मानितविश्वविद्यालयस्य) प्राक्शास्त्री, शास्त्री, आचार्यः, विशिष्टाचार्यः इत्यादिषु विविधासु कक्षासु छात्राणां प्रवेशार्थं नवीना सङ्गणकप्राविधिकप्रणाली अनुसृता आसीत् । अस्माकं कुलपतीनाम् आध्वर्यवे प्रवेशप्रक्रियेयं साफल्यमण्डिता जाता । अनया प्रणाल्या न केवलं कक्षाप्रवेशप्रक्रिया सञ्चालिताऽऽसीदपि तु छात्रवासप्रवेशप्रक्रियाऽपि सम्पादिताऽभवत् । एकेन परिचयपत्रेण (ID Card) छात्रावास-पुस्तकालय-शैक्षिकभवनेषु प्रवेशार्थं सौविध्यं परिकल्पितमासीत् ।

अस्याः प्राविधिकप्रणाल्याः विकासे विद्यापीठस्य सङ्गणकयन्त्रतन्त्रनिपुणाः System Analyst डॉ.वि.चन्द्रशेखरमहोदयाः तथा अमेरिकादेशात् समागताः सगणाः डॉ.श्रीराममहोदयाः नूतनगणकतन्त्रांशस्य (Software) निर्माणं कृत्वा महद्योगदानं कृतवन्तः । अत्र श्रीरामाः विनामूल्यं कार्यमिदं सम्पादितवन्तः इति हेतोः ते सर्वथा विद्यापीठपक्षतोऽभिनन्दनीया भवन्ति । प्रवेशप्रक्रियायां विद्यापीठस्य शैक्षिकसङ्कायप्रमुखसमेता आचार्याः, अध्यापकाः, अध्यापिकाश्च भागमगृह्णन् ।

## भूयिष्ठान्तर्जालमुक्तस्वाध्यायपाठ्यक्रमस्य परिचयात्मककार्यक्रमः
## Massive Online Open Courses (MOOCS)

दिनाङ्कः - २८.०७.२०१७



विश्वविद्यालयानुदानायोगद्वारा प्रचाल्यमानस्य भूयिष्ठान्तर्जाल-मुक्तस्वाध्यायपाठ्यक्रमस्य (Massive Online Open Courses) परिचयात्मकः कार्यक्रमः विद्यापीठस्य रमारञ्जनमुखर्जीसभाङ्गणे २८.०७.२०१७ तमे दिनाङ्के समनुष्ठितः । MOOCS इति पाठ्यक्रम-प्रणाली कथं यू.जि.सि.द्वारा SWAYAM (Student Web of Active Learning by Young and Aspiring Minds) इत्याख्यानप्रणाल्या नामिता प्रचलति तद्विषये प्रामुख्येन विचारविमर्शः अस्मिन् कार्यक्रमे विहितः ।

अस्माकं कुलपतयः आचार्याः वि.मुरलीधरमहोदयाः कार्यक्रमस्य अस्याध्यक्षा आसन् । स्वीयाध्यक्षभाषणे शर्ममहोदयाः विद्यापीठस्य सर्वेषामध्यापकानामध्यापिकानां च कृते SWAYAM इति प्रणाल्या स्वीयज्ञानवैभवं नवीनपाठ्यक्रमरूपेण परिवर्त्य प्रचारयितुमाह्वानं दत्तवन्तस्तथा च व्याकरणविभागेन ई-पीजी-पाठशालायां सम्पादितान् विविधविषयानपि समुपस्थापितवन्तः ।

कार्यक्रमेऽस्मिन् विश्वविद्यालयानुदानायोगस्य संयुक्तसचिवा आचार्या अर्चनाठाकुरमहोदया विविधपाठ्यक्रमाणां निर्माणार्थं विद्यापीठस्य अध्यापकैः सह विचारान् व्यमृशत् । सन्दर्भेऽस्मिन् सा SWAYAM इत्यस्य प्रमुखानि उद्देश्यानि समुल्लिलेख । वस्तुतः अन्तर्जालमाध्यमेन उच्चशिक्षां प्राप्तुं e-learning प्रणालीयं सर्वातिशायिनी भवतीति सा प्रत्यपादयत् ।

कार्यक्रमेऽस्मिन् सङ्कायप्रमुखाः, आचार्याः, अध्यापकाश्च सर्वे समुपस्थिता आसन् । विश्वविद्यालयस्य वरिष्ठाः गवेषकाः विषयविशेषज्ञाः साहित्य-ज्योतिष-आंग्ल-हिन्दी-योग-मातृकाशास्त्र-लिपिविज्ञान-शिक्षा-सरलसंस्कृतशिक्षा-व्याकरण-दर्शनादिषु शास्त्रेषु स्वाध्यायसामग्रीनिर्माणार्थं स्वस्वप्रस्तावान् प्रस्तुतवन्तः । आधुनिकयुगे संस्कृतविमुखानां जनानां कृते चित्ताकर्षक-समाजोपयोगि-व्यावहारिकज्ञानस्य विज्ञानस्य च यदमूल्यं दुर्लभं तथ्यं संस्कृते वर्तते तस्य पुङ्खानुपुङ्खतया पर्यवेक्षणं कृत्वा नवीनगाणकीय-पद्धत्या पाठ्यक्रमान् प्रस्तूय जनकल्याणं करणीयमिति सभायामस्यां सर्वमालोचितम् । एतदर्थं सर्वकारपक्षतः धनराशिरपि दीयत इति अर्चनामहोदया सूचितवती ।

मुक्तस्वाध्यायपाठ्यक्रमविषयेऽधिकं ज्ञातुं https://swayam.gov.in/# इति मानवसंसाधनविकासमन्त्रालयस्य जालपुटः द्रष्टव्यः ।

गोदा ये वस्त्रदारु सुभगास्तेषु रायरु - ऋ.५.४२.८ ::
*Those who give cows (or impart speech), who give clothes and are prosperous, get riches*



## पञ्चचत्वारिंशद्दिनात्मकं योगचिकित्साशिबरम्
(दिनाङ्कः - ०५.०५.२०१७ तः २१.०६.२०१७)



''शरीरं रोगमन्दिरम्'' इति शास्त्रेषु प्रसिद्धिः वर्तते । अधुना दूषित-वातावरणेन पीडिताः मानवाः विविधैः रोगैः ग्रस्ताः भवन्ति । जीवाणु-भूताणुभिः व्याप्ताः रोगाः कदाचित् औषधैः निराकर्तुं शक्यन्ते ; किन्तु तद्भिन्नाः शिरोवेदना, रक्तचापः, शरीरवेदना, मधुमेह इत्यादयः रोगाः योगमाध्यमेन दूरीकर्तुं शक्यन्ते इति योगविदामभिप्रायः ।

अस्मिन् प्रसङ्गे विद्यापीठस्य योगचिकित्साकेन्द्रपक्षतः पञ्चचत्वारिंशद् दिनात्मकं योगचिकित्साशिबिरं विद्यापीठप्राङ्गणे समायोजितम् । अस्य प्रमुखमुद्देश्यमासीत् ''स्वस्थतिरुपतिः'' । अर्थात् यथा सर्वेऽपि तिरुपतिवासिनः रोगमुक्ताः भवेयुः तदर्थं विविधानां योगासनानां शिक्षणं प्रदत्तम् । विशिष्टतया चतुर्णां दुःसाध्यरोगाणां चिकित्सार्थं योगप्रशिक्षणमिदं सञ्चालितम् । यथा — (१) मधुमेहः :(२) उंच्चरक्तचापः (३) निम्नपृष्ठवेदना (४) स्त्रीसम्बन्धिरोगाश्च ।



कार्यक्रमस्य समुद्घाटनसमारोहे चित्तूरजिल्लापालनाधिकारि-श्रीप्रद्युम्न-महोदयाः मुख्यातिथिरूपेण उपस्थिता आसन् । स्वीयभाषणे इमे वेदकालात् योगाभ्यासप्रक्रिया प्रचलतीति उक्त्वा संस्कृताध्ययनेन योगशास्त्रस्य अध्ययनं सम्यक् कर्तुं शक्यते इति संस्कृतभाषायाः महत्त्वं प्राकटयन् । तिरुमलतिरुपतिदेवस्थानस्य प्रकल्पाधिकारिणः श्री एन्.मुक्तेश्वररावमहोदयाः गौरवातिथिरूपेण समाहूता आसन् । आहार-व्यवहारद्वारा एव स्वास्थ्य-सम्पादनं कर्तुं शक्यते इति ते स्वीयभाषणे प्राबोधयन् ।

''सर्वस्मै विश्वाय योगशास्त्रं भारतप्रदत्तमुपायनम्'' इति कुलपतयः समुदघोषयन् । भारतस्य महनीयता योग-दर्शन-आयुर्वेदाख्येषु त्रिषु शास्त्रेषु सन्निहिताऽस्तीति तैरुक्तम् ।

योगचिकित्साकेन्द्रस्य निदेशकाः डॉ.राजेन्द्ररेड्डीमहोदयाः सम्पूर्णस्य कार्यक्रमस्य संयोजका आसन् । विद्यापीठच्छात्राः, अध्यापकाः, तिरुपति-नागरिकाः विपुलसंख्यया कार्यक्रमेऽस्मिन् भागं गृहीत्वा लाभान्विताः अभूवन् । अत्र १०२ संख्याकाः व्याधिपीडिताः जनाः अचिकित्स्यन्त ।

शिबिरस्यास्य समापनसमारोहः अन्ताराष्ट्रीययोगदिवसपरिपालनावसरे (२१-०६-२०१७) समन्वष्ठीयत । अत्र विद्यापीठस्य अद्वैतवेदान्तविभागस्य आचार्याः प्राक्तनकुलपतयः आचार्य एम्.एल्.एन्.मूर्त्तिमहाभागाः, तथा च दूरशिक्षाकेन्द्रस्य निदेशका आचार्य सिएच्.पि.सत्यनारायणमहोदयाः विशिष्टातिथिरूपेण समाहूयेताम् । प्रसङ्गेऽस्मिन् विद्यापीठप्राङ्गणे प्रतिष्ठापितस्य पतञ्जलिविग्रहस्य पूजाऽपि व्यधायि ।

## अन्ताराष्ट्रिययोगदिवससमारोहः (दिनाङ्कः - २१.०६.२०१७)



समारोहं समुद्घाटयन्तः आचार्य एम्.एल्.एन्.मूर्त्तिसमेताः आचार्य वि.मुरलीधरशर्म-आचार्य सिएच्.पि.सत्यनारायणमहोदयाः



उत्सवे भागग्रहीतृभिः योगकौशलप्रदर्शनम्

उच्चा दिवि दक्षिणावन्तो अस्थुः - ऋ.१०.१०७.२ :: *The liberal stay high in the celestial region*

# स्पेयिन्-देशे संस्कृतस्य प्रथमा गोष्ठी

दिनाङ्कः - १८-२०/१०/२०१७



भारत-स्पेयिन्-देशयोर्मध्ये संस्कृतभाषायाः अवबोधनसंवर्धन-अभिचेतनाज्ञानानां प्रामुख्यस्य अभिज्ञानार्थम्, विश्वस्योत्कृष्टतमभाषासु अन्यतमत्वेन संस्कृतस्य विकासाय सततप्रयत्नानाम् आवश्यकतायाः महत्त्वदानार्थम् २०१७ तमवर्षस्य अक्टोबर्मासे १८-२० दिनाङ्केषु मेड्रिडनगरस्थे कामूप्लुटेन्स् इत्याख्ये विश्वविद्यालये द्वयोः देशयोः विदुषां गोष्ठी सम्पन्ना ।

अस्यां गोष्ठ्यामधोलिखिताः निर्णयाः अनुमोदिताः –

''१) वयं संस्कृतस्य प्रथमगोष्ठ्याः समायोजनमिदं स्वागतीकुर्मः, यच्च भारत-स्पेयिन्-देशयोः विद्वद्भ्यः पारस्परिकविचारविनिमयाय समुचितमवसरं पर्यकल्पयत् ।

२) साहित्य-कला-धर्म-विज्ञानैः जनजीवनसंवर्धने तथा समरसता-समसंक्षेम-समाविष्टतालक्षणैः समन्वितायाः वैश्विकदृष्टेः विकासे संस्कृत-भाषायाः समृद्धपरम्पराणां समकालीनप्रासङ्गिकतायाश्चावश्यकतां वयं निश्चिनुमः ।

३) ''वयं भारत-स्पेयिन्-देशयोः संस्कृतभारोपीयभाषाणां विद्वत्समवाये चर्चानाम् अग्रेसारणार्थं कटिबद्धाः स्मः'' इति प्रतिजानीमहे ।

४) वयं भारत-स्पेयिन्-देशयोः उत्कृष्टसम्बन्धानां तत्रापि विशेषतया संस्कृतविदुषां, सामान्यतया शैक्षिकसमुदायानां च मध्ये सम्बन्धानाम् अग्रेऽपि प्रवर्धने महतीमावश्यकतामभिजानीमहे ।

५) वयं भारत-स्पेयिन्-देशयोः संस्कृतविदुषां मध्ये सम्बन्धानां संवर्धने अस्माकमभिलाषं प्रकटयामः ।

६) वयमस्याः प्रथमसंस्कृतविद्वद्गोष्ठ्याः संयोजनार्थं समायोजकेभ्यः, गोष्ठीषु योगदानार्थं सर्वेभ्यः प्रतिभागिभ्योऽपि कार्तज्ञ्यमाविष्कुर्मः ।

७) वयं पत्रमिदं संस्कृतेन वितरणीयमिति प्रार्थयामहे ।'' इति ।

## कुलपतीनां भागग्राहिता

सङ्गोष्ठ्यामस्यां भारतसर्वकारपक्षतः चिताः ....... संस्कृतस्य विशिष्टाः विद्वांसः गवेषकाः कार्यक्रमेऽस्मिन् भागमगृह्णन् । तेषु अस्माकं कुलपतयः प्रमुखाः भवन्ति । स्वविशिष्टव्याख्याने इमे भारतीयसंस्कृतौ समनुष्ठितानां विविधाचाराणां व्रतोपवासादीनां वैज्ञानिकतां प्रत्यपादयन् । तत्राऽप्येतैः प्रतिपादितमेकमंशमुदाजिहीर्षामः । क्षुधाजनितमरणासन्नता (Starration)माधारीकृत्य २०१६ संवत्सरे जापानदेशस्य वैज्ञानिकः डॉ.योशिनोरी ओषुमी महोदयः नोवल्-पुरस्कारमधिगतवान् ।

"Ekadasi Upavas (Fasting) and this year's Nobel Prize in Medicine..... what is the connection?" This year's (2016) Nobel Prize in Medicine has gone to a Japanese scientist Dr. Yoshinori Ohsumi for his research on AUTOPHAGY. "Autophagy, an Intracellular Recycling System otherwise means "eating self". In other words, the process by which the human body eats it own damaged cells and unused proteins. Autophagy is a natural process and also one which occurs in cases of starvation. The failure of autophagy is one of the main reasons for accumulation of damaged cells which eventually leads to various diseases in the body. Autophagy is important to prevent/fight cancer and also plays a vital role in degrading and 'consuming' cells infected by bacteria and viruses."We have to observe here that ancient India had recommended a practice of fasting (Ekadasi) one day in a fortnight. Many of us religiously follow this practice to this day as a penance for spiritual progress without any idea of the biological and therapeutic benefits of this practice. Through this process of fasting induced autophagy, our body repairs it's damaged and degenerated cells or uses up the proteins of the damaged cells for its survival."Whenever modern science conquers a frontier in any field, it somehow relates back to a quaint spiritual practice followed in India for generations."A day in a fortnight spent in prayer and divine contemplation was a tonic for t mind and soul while the practice of fasting ensured







that the body would heal and rejuvenate itself."Clearly, our ancient Rishis believed in a process of holistic healing of both the body and the mind. They were able to, quite remarkably, connect the yearning for spiritual progress in a human being with the biological necessity of the human body. One cannot but marvel, and bow one's head with admiration and reverence, at their wisdom and deep scientific understanding of the body and the mind."We may afford to forget and ignore our glorious past, but with every research, every other day by the world scholars, the magnanimity of our civilization is opening before the present day humanity. "It is time to revisit the culture of our great country



# संस्कृतं विद्यापीठञ्च प्रति विदुषां हृत्स्पन्दः

## राष्ट्रियसंस्कृतविद्यापीठसुषमा

**महामहोपाध्यायः चिन्तलपाटिपूर्णानन्दशास्त्री, नेल्लूरु**

विद्यापीठं राष्ट्रियं संस्कृताढ्यं
विद्वद्वर्यैर्भूषितं शास्त्रदक्षैः ।
विद्यार्थीड्यैर्बोधनैर्भोजनाद्यैः
श्लाघ्यं नित्यं भासतां सप्तशैले ।। १ ।।

आचार्याः परिशोधयन्ति विविधानंशान् स्वशिष्यैस्सदा
सद्ग्रन्थाश्च परिष्कृतास्सुचलिता शास्त्रार्थगोष्ठ्यो मुहुः ।
शिक्षाशास्त्रिपरीक्षया वितनुते गीर्वाणवाणीगुरून्
विद्यापीठमिदं सदा विजयते श्रीवेङ्कटेशाङ्घ्रिभाक् ।। २ ।।

शास्त्रीन्दुः श्रितकौमुदिस्समुदितश्चोद्योगलक्ष्मीर्यतः
धीरत्नामृतभाण्डभाक्समुदियायाचार्यधन्वन्तरिः ।
मध्नन्त्यत्र बुधास्सुधां विमलविज्ञानाभिधां सङ्गताः
विद्यावारिधिरेष राजति महान् विद्यालयस्संस्कृतेः ।। ३ ।।

सप्ताद्रिनाथस्य कृपाकटाक्षात्
प्रभुत्वसाहाय्यवशाच्च भूयः ।
विद्यालयोऽयं भजतान्महत्त्वं
गीर्वाणवाणीभुवि सन्निधत्ताम् ।। ४ ।।

कविपण्डितगोष्ठीनां कल्याणानां निकेतनम् ।
कमनीयमिदं भाति कमलासनलोकवत् ।। ५ ।।

विद्याप्रदानयोगेऽस्मिन् सत्कृता भूरिशो बुधाः ।
गीर्वाणवाक्पीठेनाघैर्वाचस्पत्यादिदक्षिणाः ।। ६ ।।

महत्पूर्वमहोपाध्यायाऽभिख्या यात्र मेऽर्पिता ।
बहुव्रीहिसमासेन मद्गुरूणामियं भवेत् ।। ७ ।।

जयतु जयतु विद्यापीठमेतद्वृषाद्रौ
जयतु जयतु भाषा संस्कृता संस्कृतिश्रीः ।
जयतु जयतु देशो भारतो भारतीयः
जयतु जयतु धर्मो वैदिकश्शान्तिधामा ।। ८ ।।

## संस्कृतषट्कम्

**रुरुकुमारमहापात्रः,**
अंशकालिकाध्यापकः
पुराणेतिहासविभागः, राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः

संस्कृतं संस्कृतं नूनं संस्कृतं संस्कृतं किल ।
संस्कृतं संस्कृतं सर्वं संस्कृतं संस्कृतं सदा ।। १ ।।
श्रूयतां श्रूयतां साधो शुभं सर्वं शिवं तथा ।
साध्यतां साध्यतां सर्वं सत्कार्यं संस्कृतं यथा ।। २ ।।
सदनं संस्कृतं सद्यः सकलञ्च सुसंस्कृतम् ।
स्वकीयं संस्कृतं सर्वं भवन्तु सम्भवन्तु नः ।। ३ ।।
शंसति संस्कृतं शक्रः श्रीनिवासश्च शङ्करः ।
श्रीरामः बलरामश्च श्रीकृष्णश्च सुखान्वितः ।। ४ ।।
समेषां सर्वसत्त्वानां स्वारस्यं संस्कृतं भृशम् ।
श्रीशस्य सर्वतस्सम्यक् संस्कृतं सम्बलं शुभम् ।। ५ ।।
शंस्यतां शंस्यतां सद्यः सम्यक् साधु सुशोभनम् ।
सेव्यतां संस्कृतं सर्वं सत्यं शिवञ्च सुन्दरम् ।। ६ ।।

# MODEL CAREER CENTRE (MCC) ESTABLISHED IN VIDYAPEETHA)

## INTRODUCTION

National Career Service (NCS) project is an initiative launched by the Ministry of Labour and Employment, Government of India as a Mission Mode Project for establishing quick and efficient career related services. It was launched by Prime Minister Narendra Modi on 20 July 2015 as part of government's focus on providing right skills and generating employment.

The Model Career Center at Rashtriya Sanskrit Vidyapeetha has been established under the aegis of National Career Service Project of the Ministry of Labour and Employment, Government of India. The Directorate General of Employment and Training (DGE&T), Ministry of Labour and Employment (MoLE) is implementing the National Career Service (NCS) which aims to provide a variety of employment related services.

The Government is now giving increased focus on career counselling as a key activity of NCS to enable for our aspiring youth to pursue the right career choice according to their aptitude so that they join the workforce with better skills for enhancing growth and development. It has a vision to develop Career Centres as a real exchange platform for job seekers and providers. With this background, NCS has been conceptualized as a comprehensive, multi-pronged, transformational project. Key aspects of this project include:

- Ø Establishment of Career Centres which would be enabled by making the right infrastructure and linkages available to perform counselling functions.
- Ø Implementation of a comprehensive capacity building initiative for augmenting the skills of Career Centre professionals and other ecosystem counselling partners.
- Ø Setting up a National Portal which will act as a platform to bridge the gap between Government and Private Job providing ecosystem, Job seeker and Skill development ecosystem.
- Ø Providing access to tools to analyse skill-wise demand of industry and supply of Jobseekers, as well as access to a rich knowledge repository of career counselling content in multiple languages so that candidates are counselled appropriately.
- Ø Collaboration with various stakeholders like State Governments, Schools, Colleges, Jobseekers, Skill Development Institutions, Employers, NGO's, Volunteer Agencies, Technology partners, Verification agencies etc.
- Ø Appropriate Information, Education and Communication (IEC) strategies to reach out to the stakeholders.

Accordingly, this scheme is focussed on establishing Career Centres in a phased approach ensuring that standardized set of services are offered all across. Accordingly it is proposed to implement Model Career Centres in Industrial clusters, Education & Training Institutions, Tertiary Sector Clusters, Rural and Semi-urban centres (KSK, PRI, CSC etc.), Corporate setups, Employment Exchanges etc. nationwide. States/ institutions keen to set up such centres will be expected to replicate services offered in these model centres to other Career Centres.

## OBJECTIVES

Career Centres will connect local youth and other job-seekers with all possible job opportunities in a transparent and effective manner through the use of technology as well as through counseling and training. While the state-of-the-art technology driven National Career Service Portal (www.ncs.gov.in) will, in a sustained manner, provide information about available job opportunities and resources for Career Centres to function effectively, the Career Centres would be the pivotal outreach and counseling interface of the National Career Service for teeming millions of aspiring youth from rural, semi urban areas as well as from disadvantaged sections of the society.

These Centres would be staffed by motivated and competent personnel, enabled with necessary tools and infrastructure for:

- Ø effectively and continuously assessing demand of skills in labour markets, local in other States and abroad;
- Ø guiding youth visiting the Centres or by outreach to schools/colleges, various training institutions, about the training, on-the-job training, job opportunities, etc., according to their aptitude and potential, and
- Ø connecting youth and other job seekers with jobs through portal, job fairs and other possible interface with employees such as campus placements.
- Ø mobilizing employers and other placement agencies to connect to NCS for meeting their HR requirements

### SERVICES OFFERED THROUGH CAREER CENTRE

Career Centres will be responsible for all activities related to the NCS project and will be linked to the NCS portal services for improved quality of services and outcomes. Activities to be performed by Career Centres can be categorized as follows:

- Ø Coverage - Catchment Area: Each Career Centre would cater to a catchment area comprising around 3-4 adjacent districts covering an area of approximately 100 sq. kms to map out the availability of institutions, industry, demographics etc. and post the details on the NCS portal for general access.



- Ø Demand side – Industry Interaction: Career Centres will undertake market sizing exercise to estimate the number of employment opportunities in their area, associated skill requirements, skill training capacity availability etc.
- Ø Supply side – Candidate Engagement: On the supply side, Career Centres will provide counselling services to the job seekers and make them aware of opportunities based on their skills, area of interest and requirement.
- Ø Job and Skill Mapping: Career Centre will undertake the job skill mapping for identification of right fit job for candidate.
- Ø IEC activities: Career Centre will through multi-pronged IEC strategy increase awareness amongst the various stakeholders like skill training institutes, assessment bodies, schools and college administration, local community leaders, government departments and public in general about the services available.
- Ø Last Mile Employability courses: The Ministry is evolving a scheme for offering Last Mile Employability courses for enhancing the employability of youth.



Co-ordinator of MCC
**DR. V.RAMESH BABU**
Asst. Professor, Dept. of Mathematics

## शैक्षिक-सांस्कृतिक-कार्यक्रमचित्रवीथिका













विविधसांस्कृतिककार्यक्रमेषु नृत्याद्यभिनयान् प्रदर्शयन्तः विद्यापीठीयाध्यापकाश्छात्राश्च



डॉ.बी.आर्.आम्बेदकरजयन्तीमुपलक्ष्य भाषमाणाः कुलपतयः मञ्चासीनाः अतिथयश्च



विद्यापीठशोधच्छात्रैस्समायोजितं रक्तदानशिबिरं प्रदीपप्रज्ज्वालनेन समुद्घाटयन्तः अध्यापकच्छात्रच्छात्रासमेताः कुलपतयः



विद्यापीठस्य उत्कलपीठाध्वर्यवे तिरुपतिस्थ ISCON संस्थायाः सहयोगेन आषाढशुक्लद्वितीयातिथौ (25th June,2017 ) भगवतः श्रीजगन्नाथस्य रथयात्रामहोत्सवपालनम्



मानवसंसाधनविकासमन्त्रालयस्य मान्यवरराज्यमन्त्रिभिः डॉ.सत्यपालसिंहमहोदयैस्सह अस्माकं कुलपतयः आचार्य डॉ.मुरलीधरशर्ममहोदयाः

## विद्यापीठाचार्याणां सचिवत्वेन नियुक्तिः



अस्माकं विद्यापीठस्य अनुसन्धानप्रकाशनविभागस्य वरिष्ठा आचार्याः
बादरायणव्याससम्मानविभूषिताः आचार्याः
**डॉ.विरूपाक्ष वि.जड्डिपालमहोदयाः**
भारतसर्वकार-मानवसंसाधनविकासमन्त्रालयद्वारा सञ्चालितस्य उज्जैनस्थस्य महर्षिसान्दिपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सचिवत्वेन नियुक्ताः ।
एतदर्थं तेभ्यः विद्यापीठपरिवारसदस्या अभिनन्दनानि विज्ञापयन्ति ।

## केन्द्रसाहित्याकादेम्या अनुवादपुरस्कारः

नवदेहलीस्थकेन्द्रसाहित्य अकादेमी फिब्रवरी २०१७, २१ तमे दिनाङ्के २०१६तमवर्षीयानुवादपुरस्कारप्रदानार्थं चितानां विविधभारतीयभाषानुवक्तृणां नामानि समुदघोषयन् । तेषु संस्कृतभाषानुवक्तृपुरस्कारेणालमकारि आचार्यराणिसदाशिवमूर्त्तेः नाम । दिवंगतेन डा.श्री.राल्लबण्डिकविताप्रसादमहोदयेन आन्ध्रभाषायां विरचितं "**ओण्टरि पूलबुट्ट**" इति ख्यातं कवितासमुच्चयं संस्कृतभाषायां "**विविक्तपुष्पकरण्डः**" इति नाम्ना अन्ववदन् आचार्यराणिसदाशिवमूर्त्तयः । एतस्यानुवादग्रन्थस्य गुणवत्तामवलम्ब्य पुरस्कारोऽयमुदघोषि ।








**विश्वविद्यालयस्य कुलपतिसमेताः सर्वेऽप्यध्यापकाः, अध्यापिकाः, कर्मचारिणः तेषामेतादृशगौरवावहसम्मानप्राप्तये तेभ्योऽभिनन्दनं विज्ञापयन्ति ।**

## शेमुषीपरिवारः

**मुख्यपुरोधा**



**आचार्य मुरलीधरशर्मा**
**कुलपतिः**

**मार्गदर्शकः प्रकाशकश्च**



**आचार्य सिएच्.पि.सत्यनारायणः**
**कुलसचिवः**

**सम्पादकौ**



**आचार्य कोराड सूर्यनारायणः**



**डॉ.सोमनाथ दाशः**

**Dear Readers !**
**Your suggestions are solicited to improve the quality of our Newsletter.**
**Please send your views or Feed Back to the Editors mail** editorsemushi@gmail.com
**Thank you**
**EDITORS**